न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

माणिकचन्द-दिगम्बर-जैन-

ग्रन्थमाला ।

११

आचारसारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणिकचन्द्र-दिगम्बरजैन-ग्रन्थ-मालाका ११ वाँ पुष्प ।

श्रीमद्वीरनन्दिसैद्धान्तिकचक्रवर्तिप्रणीतः

आचारसार ।

जयपुरनिवासिपण्डितेन्द्रलालसाहित्यशास्त्रिणा
संपादितः
पण्डितमनोहरलालशास्त्रिणा च संशोधितः ।



प्रकाशिका—
माणिकचन्द्र-दि० जैनग्रन्थमालासमितिः ।

मार्गशीर्ष, वीर नि० सं० २४४४

विक्रमाब्द १९७४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकाशक—
नाथूरामप्रेमी,
मंत्री, माणिकचन्द्र ग्रन्थमाला,
हीराबाग पो० गिरगांव **बम्बई**।

मुद्रक—
चिंतामण सखाराम देवळे,
मुंबईवैभव प्रेस, सर्व्हेंट्स् ऑफ इंडिया
सोसायटीज बिल्डिंग, गिरगांव–**बम्बई.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवेदन ।

इस ग्रन्थके रचयिता आचार्य श्रीवीरनन्दि हैं । इनकी गणना बहुत बड़े विद्वानोंमें है । ये 'सिद्धांतचक्रवर्ती' पदवीसे विभूषित थे और मूल संघ, पुस्तक गच्छ और देशीय गणके आचार्य थे । इनके गुरुका नाम जैसा कि इस ग्रन्थके अन्तमें दी हुई प्रशस्तिसे मालूम होगा—मेघचन्द्र सिद्धांतचक्रवर्ती था । प्रशस्तिमें और श्रवणबेलगुलके शिलालेखोंमें इनकी बहुत ही प्रशंसा की हुई है । ४७ नम्बरके शिलालेखके नीचे लिखे तीन श्लोकोंको देखिए:—

तर्कन्यायसुवर्त्मवेदिरमलार्हत्सूक्तिसन्मौक्तिकः
शब्दग्रंथविशुद्धशंखकलितः स्याद्वादसद्विद्रुमः ।
व्याख्यानोर्जितपोषणप्रविपुलप्रज्ञोद्भवीचीचयो
जीयाद्विश्रुतमेघचन्द्रमुनिपस्त्रैविद्यरत्नाकरः ॥

श्रीमूलसंघकृतपुस्तकगच्छदेशी-
योद्यद्गणाधिपसुतार्किकचक्रवर्ती ।
सैद्धान्तिकेश्वरशिखामणिमेघचन्द्र-
स्त्रैविद्यदेव इति सद्विबुधाःस्तुवन्ति ॥

सिद्धान्ते जिनवीरसेनसदृशाः शास्त्राब्जनीभास्करः
षट्तर्केष्वकलंकदेवविबुधः साक्षादयं भूतले ।
सर्वव्याकरणे विपश्चिदधिपः श्रीपूज्यपादः स्वयं
त्रैविद्योत्तममेघचन्द्रमुनिपो वादीभपंचाननः ॥

इन श्लोकोंसे मालूम होगा कि ग्रन्थकर्ताके गुरु न्याय, व्याकरण, सिद्धान्त आदि सभी विषयोंके अपूर्व विद्वान् थे । उनके अनेक शिष्य थे, जिनमेंसे प्रभाचन्द्र और शुभचन्द्र आदि कई प्रधान शिष्योंके स्मृतिलेख श्रवणबेलगुलकी शिलाओंपर खुदे हुए हैं ।

कर्नाटककविचरित्रसे मालूम होता है कि इन मेघचन्द्रने आचार्य पूज्यपादके समाधितंत्रकी एक टीका लिखी है और ये अभिनव पंप (नागचन्द्र) के गुरु बालचन्द्रके सहाध्यायी थे । मेघचन्द्रकी गुरुपरम्परा इस प्रकार थी:—गोलाचार्य—अभयनन्दि—सोमदेव—सकलचन्द्र और मेघचन्द्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचार्य वीरनन्दिका मेघचन्द्रके साथ पिता-पुत्रका भी सम्बन्ध था। यथा—

वैदग्ध्यश्रीवधूटीपतिरतुलगुणालंकृतिर्मेघचन्द्र-
त्रैविद्यस्यात्मजातो मदनमहिभृतो भेदने वज्रपातः।
सैद्धान्तव्यूहचूडामणिरनुपमचिन्तामणिर्भूजनानां
योऽभूत्सौजन्यरुन्द्रश्रियमधति महौ वीरनंदी मुनीन्द्रः॥

यह श्लोक इस ग्रन्थकी प्रशस्तिमें भी है और श्रवणबेलगुलके ५० वें शिलालेखमें भी।

श्रवणबेलगुलके नं० ४७–५० और ५२ नम्बरके लेखोंसे मालूम होता है कि आचार्य मेघचन्द्रका स्वर्गवास शक संवत् १०३७ (वि० संवत् ११७२) में और उनके शुभचन्द्र देव नामक शिष्यका स्वर्गवास शक सं० १०६८ (वि० १२०३) में हुआ था तथा उनके दूसरे शिष्य प्रभाचन्द्र देवने शक सं० १०४१ (वि० सं० ११७६) में एक महापूजा प्रतिष्ठा कराई थी। इससे मालूम होता है कि आचारसारके कर्त्ता श्रीवीरनन्दि सिद्धान्तचक्रवर्ती इसी समयके लगभग अर्थात् विक्रमकी बारहवीं शताब्दिमें हो गये हैं।

कर्नाटककविचरित्रके कर्त्ताने नागचन्द्र कविका समय वि० सं० ११६२ के लगभग निश्चित किया है और इस कविके गुरु बालचन्द्रको मेघचन्द्रका सहाध्यायी बतलाया है। इससे भी मालूम होता है कि मेघचन्द्रके शिष्य वीरनन्दिका समय विक्रमकी १२ वीं शताब्दिका उत्तरार्ध ठीक है।

चन्द्रप्रभचरित काव्यके कर्ता महाकवि वीरनन्दि इनसे भिन्न हैं। वे अभयनन्दिके शिष्य और गुणनन्दिके प्रशिष्य थे। वे हुए भी इनसे पहले हैं।

इनके बनाये हुए अन्य किसी ग्रन्थका नाम हमें मालूम नहीं।

इस ग्रन्थका सम्पादन और संशोधन केवल एक प्रतिके आधारसे हुआ है जो कि हमें स्वर्गीय विद्याप्रेमी सेठ माणिकचन्द्रजीके चन्द्रप्रभचैत्यालयके सरस्वती-भंडारसे प्राप्त हुई थी। इस प्रतिपर उसके लिखे जानेका समय नहीं लिखा है, तो भी वह कमसे कम २५०–३०० वर्ष पहलेकी लिखी हुई होगी, ऐसा जान पड़ता है। प्रति बहुत शुद्ध है और किसी विद्वानके द्वारा किये गये टिप्पणसहित है।

निवेदक—
नाथूराम प्रेमी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीः ॥

महाकवि-श्रीवीरनन्दि-प्रणीतः

आचारसारः ।

लक्ष्मीं वीरजिनेश्वरः पदनतानंतामराधीश्वरः
पद्मासद्मपदांबुजः परमचिल्लीलात्ततत्त्वव्रजः ।
विद्यानद्युदयाचलोऽमितबलः शान्ताखिलैनोमलो
दद्यान्नस्त्रिजगन्नतिं गुणमणिव्रातोज्ज्वलालंकृतिम् ॥ १ ॥

विनेयसस्योत्पलपुण्यवारि-
प्रस्यन्दनानन्दनमेघचन्द्रः ।
श्रीवासुपूज्यो व्रतिवंद्यपादो
वरप्रदः स्तान्मम योगिवर्गः ॥ २ ॥

संसारनीराकरमुत्तरीतुं
तैरिश्चरित्रं गुणरत्नपात्रम् ।
सद्दर्शनज्ञानसमेतमेत-
त्तत्पक्षलक्ष्माहमिहाऽस्य वक्ष्ये ॥ १ ॥

देहव्यूहमहीजराजिभयदे दुःखावलीश्वापदे
विश्वाशांतिकरालकालदहने शुष्यन्मनीषावने ।
नानादुर्णयमार्गदुर्गमतमे दृङ्मोहिनां देहिनां
जैनं दर्शनमेकमेव शरणं जन्माटवीसंकटे ॥ २ ॥

---

१ चिदेव लीला । २ नष्टाखिलपापमलः । ३ नौका ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायोऽयं रसरक्तमांसविसरो मेदोऽस्थिमज्जव्रजो
बीभत्सो वितताँत्यधातुरुदितः शुक्रार्त्तवाभ्यां क्षयी ।
जीवाश्लेषवशात्तकान्तिरखिलक्लेशैकनीडो जडः
संगोऽनेन सतां दुनोति हृदयं मोदोऽत्र लज्जास्पदम् ॥ ३ ॥

चेतस्त्वं किमिति व्रजस्यतितरां भ्रान्तिस्तवात्राऽस्ति किं
मोहोत्पादकमिन्द्रजाललालिते कान्तैककान्तेऽक्षजे ।
सौख्यं ते विरसेऽभिमानसरसे कान्ताश्च तद्दर्पण—
प्रोल्लासिप्रतिबिंबडंबरभराः संमोहदाः केवलम् ॥ ४ ॥

मत्त्वैवं भवदेहभोगजनितक्लेशाग्निहृत्प्लोषण—
स्तच्छान्त्यै प्रगुणस्तदक्षयपदानन्दामृतान्वेषणः ।
शुश्रूषाश्रवणादिपुण्यधिषणः सद्भव्यताभूषण—
श्चार्वीं चारु परीक्षितान्यसमयाप्ताचारसद्दूषणः ॥ ५ ॥

युक्त्या युक्तं जिनोक्तं जिनवृजिनजिनं दत्तहस्तावलंबं
जन्मोदन्वन्निमज्जद्बहुरुदुरितभरार्त्तांङ्गिनां तद्दयाढ्यम् ।
धर्मं स्वर्मोक्षशर्मप्रदमपि मुदितः प्राप्य दुःप्रापमीशं
प्रीत्यै प्रीत्यर्त्तिपापप्रभवभवकरागारचारातिभीरुः ॥ ६ ॥

सन्नाथं परिपूर्णनिर्मलकलं सल्लक्ष्मलक्ष्मीकुलं
दोषासंगमनंगराजविजयं नित्यं सुवृत्तोदयम् ।
स्वान्तध्वान्तविनाशिनं कुवलयानन्दामृतस्यन्दिनं
प्रीत्योपेत्य मुनीन्द्रचन्द्रमपरं तत्पादसेवापरः ॥ ७ ॥

नत्वा तमीशं विनतार्त्तिनाशं
विज्ञापितात्मीयमनोगतार्थः ।
संगानपेक्षां मम देहि दीक्षां
दयामयीं भो ! यतिवल्लभेति ॥ ८ ॥

प्राज्ञेन ज्ञातलोकव्यवहृतिमतिना तेन मोहोज्झितेन
प्राग्विज्ञातः सुदेशो द्विजनृपतिवणिग्वर्णवर्ण्योङ्गपूर्णः ।

१ वैचित्र्यदाः । २ अत्राऽनुप्रासः । ३ समुद्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूभूलोकाऽधिरुद्धः स्वजनपरिजनोन्मोचितो वीतमोह-
श्चित्रापस्माररोगाद्यपगत इति च ज्ञातिसंकीर्त्तनाद्यैः ॥ ९ ॥
ततस्तदाज्ञामृतपानपुष्टो निर्बन्धगन्धद्विपवत्प्रहृष्टः ।
बाह्यान्तरंगं परिहृत्य संगं शस्तें मुहूर्त्ते स्थिरलग्नपूर्त्ते ॥ १० ॥
प्रीत्या चैत्यगृहादिदक्षिणदिशि क्षोणीतले प्रासुके
प्राचीसन्मुखमुत्तरास्यमथवा कृत्वा सरोजासनम् ।
आसीनश्चिकुरोत्करं भवलतां वा दक्षिणावृत्तितः
प्रोत्पाद्याविकृतिं जगत्त्रयनतिं स्वीकृत्य जाताकृतिम् ॥ ११ ॥
प्रदक्षिणीकृत्य जिनेन्द्रगेहं प्रविश्य जैनप्रतिबिंबपार्श्वे ।
रम्ये स्थले वा व्रतिपाङ्गयैव क्रियां विधायात्तमहाव्रतादिः ॥१२॥
स्थित्वा ततः प्रमुदितो गुरुवामपार्श्वे
श्रुत्वा प्रतिक्रमणमीडितयोगिवर्गः ।
योऽयं जिनोक्तविधिनाऽधिगतागमार्थ-
श्चारित्रसंपदमुदंचति[1] तां गुणालीम् ॥ १३ ॥
युक्ताः पंचमहाव्रतैः समितयः पंचाक्षरोधाशयाः
पंचावश्यकषट्कलुञ्चनयराचेलक्यमस्नानता ।
भूशय्यास्थितिभुक्तिदन्तकषणं चाह्नयेकभक्तं यता-
वेवं मूलगुणाष्टविंशतिरियं मूलं चरित्रश्रियः ॥ १४ ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यमसङ्गता ।
महाव्रतानि पंचैव निःशेषावद्यवर्जनात् ॥ १५ ॥
जन्मकायकुलाक्षाद्यैर्ज्ञात्वा सत्त्वततिं श्रुतेः ।
त्यागस्त्रिशुद्ध्या हिंसादेः स्थानादौ स्यादहिंसनम् ॥ १६ ॥
रागद्वेषादिजासत्यमुत्सृज्यान्याहितं वचः ।
सत्यं तत्त्वान्यथोक्तं च वचनं सत्यमुत्तमम् ॥ १७ ॥
बह्वल्पं वा परद्रव्यं ग्रामाद्यौ पतितादिकम् ।
अदत्तं यत्तदादानवर्जनं स्तेयवर्जनम् ॥ १८ ॥

---

१ सन्दिग्धोऽयं पाठः । २ प्राप्नोति । ३ नैर्वस्त्र्यं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागलोककथात्यागः सर्वस्त्रीस्थापनादिषु ।
माताऽनुजा तनूजेति मत्या ब्रह्मव्रतं मतम् ॥ १९ ॥
चेतनेतरबाह्यांतरंगसंगविवर्जनम् ।
ज्ञानसंयमसंगो वा निर्ममत्वमसंगता ॥ २० ॥
ईर्याभाषैषणादाननिक्षेपोत्सर्गसंज्ञिकाः ।
व्रतत्राणाय पंचैताः स्मृताः समितयो यतेः ॥ २१ ॥
पुरो युगान्तरेऽक्षस्य दिने प्रासुकवर्त्मनि ।
सदयस्य सकार्यस्य स्यादीर्यासमितिर्गतिः ॥ २२ ॥
भेदपैशून्यपरुषप्रहासोक्त्यादिवर्जिता ।
हितमितानिःसन्देहा भाषाभाषासमित्याख्या ॥ २३ ॥
षट्चत्वारिंशद्दोषोना प्रासुकान्नादिकस्य या ।
एषणासमितिर्भुक्तिः स्वाध्यायध्यानसिद्धये ॥ २४ ॥
ज्ञानोपकरणादीनामादानं स्थापनं च यत् ।
यत्नेनाऽऽदाननिक्षेपसमितिः करुणा परा ॥ २५ ॥
दूरगूढविशालाविरुद्धशुद्धमहीतले ।
उत्सर्गसमितिर्विण्मूत्रादीनां स्याद्विसर्जनम् ॥ २६ ॥
चक्षुःश्रोत्रघ्राणजिह्वास्पर्शाक्षगोचरे भिक्षोः ।
रत्यरतिचित्तवृत्ते रोधः स्यादक्षसंरोधः ॥ २७ ॥
चेतनेतरवस्तूनां हर्षमर्षाकरक्रिया ।
वर्णसंस्थानभेदेषु चक्षुरोधोऽविकारधीः ॥ २८ ॥
जीवाजीवोभयोद्भूते चेतोहारीतरस्वरे ।
रागद्वेषाविलस्वान्तदण्डनं श्रोत्रदण्डनम् ॥ २९ ॥
प्रकृतिप्रयोगगन्धे जीवाजीवोभयाश्रये ।
शुभेऽशुभे मनःसाम्यं घ्राणेन्द्रियजयं विदुः ॥ ३० ॥
गृहिदत्तेऽन्नपानादावदोषे समतायुतम् ।
गात्रयात्रानिमित्तं यद्भोजनं रसनाजयः ॥ ३१ ॥
जीवाजीवोभयस्पर्शे कर्कशाद्यष्टभेदके ।
शुभेऽशुभेऽतिमध्यस्थं मनः स्पर्शाक्षनिर्जयः ॥ ३२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवश्यकक्रियाषट्कं समतास्तववंदनम् ।
सप्रतिक्रमणं प्रत्याख्यानं कायविसर्जनम् ॥ ३३ ॥
लाभालाभसुखक्लेशप्रमुखे समतामतिः ।
स्वायत्तकरणस्वान्तज्ञानिनः समता मता ॥ ३४ ॥
कृत्वा गुणगणोत्कीर्तिनामव्युत्पत्तिपूजनम् ।
वृषभादिजिनाधीशस्तवनं स्तवनं मतम् ॥ ३५ ॥
जैनैकतीर्थकृत्सिद्धसाधूनां क्रिययान्वितम् ।
वन्दनं स्तुतिमात्रं वा वन्दनं पुण्यनन्दनम् ॥ ३६ ॥
निन्दनं गर्हणं कृत्वा द्रव्यादिषु कृतागसाम् ।
शोधनं वाङ्मनःकायैस्तत्प्रतिक्रमणं मतम् ॥ ३७ ॥
यन्नामस्थापनादीनामयोग्यपरिवर्जनम् ।
त्रिशुद्ध्याऽनागते काले तत्प्रत्याख्यानमीरितम् ॥ ३८ ॥
स्तवनादौ तनुत्यागः श्रीमत्पंचगुरुस्मृतिः ।
व्युत्सर्गः स्याच्छ्रुतप्रोक्तोच्छ्वासावसरलक्षणः ॥ ३९ ॥
कूर्चश्मश्रुकचोल्लुञ्चो लुंचनं स्यादमी यतः ।
परीषहजयाऽदैन्यवैराग्यासंगसंयमाः ॥ ४० ॥
तच्चतुस्त्रिद्विमासेषु सोपवासे विधीयते ।
जघन्यं मध्यमं ज्येष्ठं सप्रतिक्रमणे दिने ॥ ४१ ॥
वल्कलाजिनवस्त्राद्यैरंगासंवरणं वरम् ।
आचेलक्यमलंकारानंगसंगविवर्जितम् ॥ ४२ ॥
संयमद्वयरक्षार्थं स्नानादेर्वर्जनं मुनेः ।
जलस्वेदमलालिप्तगात्रस्यास्नानता स्मृता ॥ ४३ ॥
प्रसन्नप्रासुकाऽनात्मसंस्कृतेलाशिलादिषु ।
एकपार्श्वेन कोदण्डदण्डशय्या महीशयः ॥ ४४ ॥
स्वपात्रदातृशुद्धोर्व्यां स्थित्वा समपदद्वयम् ।
निरालंबं करद्वन्द्वभोजनं स्थितिभोजनम् ॥ ४५ ॥
दृशनाघर्षणं पाषाणांगुलीत्वङ्नखादिभिः ।
स्याद्दन्ताकर्षणं भोगदेहवैराग्यमन्दिरे ॥ ४६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदयास्तोभयं त्यक्त्वा त्रिनाडीभोजनं सकृत् ।
एकद्वित्रिमुहूर्तं स्यादेकभक्तं दिने मुनेः ॥ ४७ ॥
येषां भूषणतां गता गुणगणैकावल्यलं निर्मला
येयं विश्वनरामरेश्वरमिलिन्दानन्दिपादाम्बुजाः ।
ते यान्ति श्रमणाग्रगण्यपदवीगण्या वरेण्यं पदं
सिद्धिश्रीपरिरंभणामृतसुखास्वादास्पदं योगिनः ॥ ४८ ॥
प्रोन्निर्यत्करनीलरत्नरुचिरोदाराङ्गचेतोहरः
पूर्णोदीर्णसदाश्रयान्तरमहाभोगास्पदाशोत्करः ।
गंभीरास्तसमस्तदोषमधुरध्वानोद्यदानन्दनः
सर्वोर्वीसुखसंपदेऽस्त्वमृतदो नेमिर्घनः पावनः ॥ ४९ ॥

इति श्रीवीरनन्दिसिद्धान्तिचक्रवर्तिविरचिते श्रीआचारसार-
नाम्नि शास्त्रे प्रथमोऽधिकारः ॥ १ ॥

अथ द्वितीयोऽधिकारः ॥ २ ॥

श्रियः पदं सर्वविदः पदाम्बुजं नमन्निलिंपालिमिलिन्दमान्दिरम् ।
सन्मानसोल्लासिनखांशुकेसरं पार्श्वस्य नः स्ताद्धरदं जिनेशिनः ॥१॥

तनोति संपदं नीतिर्यद्वत्तद्वद्गुणश्रियम् ।
सत्प्रियां या समाचारनीतिः सा कीर्त्यतेऽधुना ॥ २ ॥
समैः समानः सं सम्यगाचारो यः समैर्युतैः ।
आचार्यत इति प्राज्ञैः स समाचार ईरितः ॥ ३ ॥
एष संक्षेपविस्तारद्विभेदो दशभेदगः ।
संक्षेपोऽनल्पभेदोऽन्य आदिभेदा इमे दश ॥ ४ ॥
इच्छामिथ्यातथाकारेच्छावृत्त्याशीर्निषिद्धिका ।
आप्रच्छत्तं प्रतिप्रश्नश्चानिमंत्रणसंश्रयौ ॥ ५ ॥

१ भ्रमरः २ मोक्षं ३ निलिंपाः सुराः ४ समाचारस्य व्युत्पत्तिमाह ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुस्तकातापयोगादेर्या याच्ञा विनयान्विता ।
स्वपरार्थे यतीन्द्राणां सेच्छाकारः प्ररूपितः ॥ ६ ॥
यन्मया दुष्कृतं पूर्वं तन्मिथ्याऽस्तु न तत्पुरः ।
करोमीति मनोवृत्तिर्मिथ्याकारोऽतिनिर्मलः ॥ ७ ॥
तत्त्वाख्यानोपदेशादौ नान्यथा भगवद्वचः ।
तत्तथेत्यादरेणोक्तिस्तथाकारो गुणाकरः ॥ ८ ॥
पूर्वोक्तज्ञानतापयोगोपकरणादिषु ।
सेच्छावृत्तिर्गणीच्छानुवृत्तिर्या विनयास्पदा ॥ ९ ॥
स्थिता वयमियत्कालं यामः क्षेमोदयोऽस्तु ते ।
इतीष्टाशंसनं व्यंतरादेराशीर्निरुच्यते ॥ १० ॥
जीवानां व्यन्तरादीनां बाधायै यन्निषेधनम् ।
अस्माभिः स्थीयते युष्मद्दिष्टचैवेति निषिद्धिका ॥ ११ ॥
प्रवासावसरे कन्दरावासादेर्निषिद्धिका ।
तस्मान्निर्गमने कार्या स्यादाशीर्वैरहारिणी ॥ १२ ॥
ग्रंथारंभकचोल्लोचकायशुद्धिक्रियादिषु ।
प्रश्नः सूर्यादिपूज्यानां भवत्याप्रच्छनं मुनौ ॥ १३ ॥
यत्किंचन महत्कार्यं कार्यं पृष्ट्वा यतीश्वरान् ।
विनयेन पुनः प्रश्नः प्रतिप्रश्नः प्रकीर्तितः ॥ १४ ॥
पुस्तकादौ पुरा दत्ते नात्मार्थे यन्निवेदनम् ।
जिघृक्षायां पुनः सूरिप्रमुखेष्वानिमंत्रणम् ॥ १५ ॥
विनयक्षेत्रमार्गाणां संश्रयः सुखदुःखयोः ।
सूत्रस्य चेत्ययं पंचप्रकारः संश्रयः स्मृतः ॥ १६ ॥
वीक्ष्याऽऽगन्तुकमायांतं यतिमुत्थाय संभ्रमात् ।
पदानि सप्त गत्वा च कृत्वा तद्योग्यवन्दनम् ॥ १७ ॥
मार्गश्रान्तिमपोह्यासनप्रदानादियत्नतः ।
त्रिरत्नसुस्थितादीनां प्रश्नो विनयसंश्रयः ॥ १८ ॥ युग्मम् ।

१ गृहीत २ ग्रहीतुमिच्छायां ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यक्त्वा दुर्नृपमेक्ष्माषं[1] पापं पापिजनाकुलम् ।
देशं दीक्षोन्मुखापेतं दुर्भिक्षं क्लेशदायकम् ॥ १९ ॥
निर्बाधसस्यवद्यत्र वर्द्धते गुणमण्डलम् ।
क्षेत्रसंश्रयणं तत्राऽऽवासश्चेतःसुखावहः ॥ २० ॥ युग्मम् ।
आगन्तुकमुनेर्मार्गयानागमनजातयोः ।
यः सुखासुखयोः प्रश्नः सोऽयं स्यान्मार्गसंश्रयः ॥ २१ ॥
चौरक्रूरगदोर्वीशपीड़िताद्यर्तिवर्त्तिनाम् ।
तोषोत्कर्षणमाहारभेषजायतनादिभिः ॥ २२ ॥
स्वात्मार्पणमहं तुभ्यमस्मीति च सुखेऽसुखे ।
यत्तच्चित्तप्रसादार्थं तत्सुखासुखसंश्रयः ॥ २३ ॥ युग्मम् ।
पुरा स्वगुरुपादान्ते शास्त्रं श्रुत्वाऽखिलं पुनः ।
जिज्ञासायां स्वलोकान्यथा ग्रंथातिशये मुनिः ॥ २४ ॥
भक्त्योपेत्य गुरूक्त्वा युष्मत्पादप्रसादतः ।
अन्यन्मुनीन्द्रवृन्दं मे द्रष्टुं वाञ्छा प्रवर्त्तते ॥ २५ ॥
इत्येवं बहुशः स्पृष्ट्वा लब्ध्वाऽनुज्ञां गुरोर्व्रजेत् ।
व्रतिनैकेन वा द्वाभ्यां बहुभिः सह नान्यथा ॥ २६ ॥ त्रिकलम् ।
ज्ञानसंहननस्वांतभावनाबलवन्मुनेः ।
चिरप्रव्रजितस्यैकविहारस्तु मतः श्रुते ॥ २७ ॥
एतद्गुणगणापेतः स्वेच्छाचाररतः पुमान् ।
यस्तस्यैकाकिता मा भून्मम जातु रिपोरपि ॥ २८ ॥
श्रुतसंतानविच्छित्तिरनवस्था यमक्षयः ।
आज्ञाभंगश्च दुःकीर्तिस्तीर्थस्य स्याद्दुरोरपि ॥ २९ ॥
अग्नितोयगराजीर्णसर्पक्रूरादिभिः क्षयः ।
स्वस्याप्यार्त्तादिकादेकविहारेऽनुचिते यतः ॥ ३० ॥ युग्मम् ।
गत्वातः सूर्युपाध्यायवर्त्तकस्थविरान्वितम् ।
गणं गणधरोपेतमुपेयादीदृशाश्च ते ॥ ३१ ॥

---

१ क्ष्मां भुवं न पीताति 'अक्ष्मापस्तम्' २ नृप ३ प्राप्नुयात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संग्रहानुग्रहप्रौढो रूढः श्रुतचरित्रयोः ।
यः पंचविधमाचारमाचारयति योगिनः ॥ ३२ ॥
बहिः क्षिप्तमलः सत्त्वगांभीर्यातिप्रसादवान् ।
गुणरत्नाकरः सोऽयमाचार्योऽवार्यधैर्यवान् ॥ ३३ ॥ युग्मम् ।
संसारज्वरसंतापच्छेदि यद्वचनामृतम् ।
पीयते भव्यलोकेन प्रीत्या नित्यं स देशकः ॥ ३४ ॥
प्रभावनाधिकोऽबाधमन्नाद्यैः संघवर्त्तकः ।
जगदादेयवाग्मूर्तिर्वर्त्तकः कालदेशवित् ॥ ३५ ॥
समयस्थितिसद्नीतिः स्थविरः स्याद्गुणस्थिरः ।
रणरक्षाक्षमः सूरिर्गुणी गणधरः स्मृतः ॥ ३६ ॥
तं प्राप्य तद्गणाधीशमभ्यायांतं सहात्मनः ।
गणेनाऽऽज्ञानतिस्वीकारेच्छावात्सल्यकारणैः ॥ ३७ ॥
प्रीत्या प्रेक्ष्यातिभक्त्या तं प्रणम्य गणमप्यथ ।
मार्गातिचारानियमं निवर्त्यान्याः क्रिया अपि ॥ ३८ ॥
वंदित्वा गणिनं गणमप्युचितक्रियया दिनम् ।
तद्विश्रम्य द्वितीयेऽह्नि तृतीये वासरेऽथवा ॥ ३९ ॥
गणिमं गुणिनं संघगुणसंघमवेत्य तम् ।
दयादमशमावश्यकक्रियाकरणादिषु ॥ ४० ॥
सूरिं संश्रित्य नत्वेष्टं स्वस्य विज्ञापयेच्छनैः ।
दत्वाऽस्मै चेतनाचेतनांतरालार्जितोपधिम् ॥ ४१ ॥
गुरुसन्तानचारित्रशुद्धेो ग्राह्यो यदीतरः ।
कृत्वा छेदमुपस्थापनादिशुद्धश्च नेतरः ॥ ४२ ॥
शिलाभिन्नघटाजाविडालमृच्चालिनीशुकैः ।
मशका चाहिमहिषैरपि श्रोतॄन् समान् त्यजेत् ॥ ४३ ॥
मोहादिना निषिद्धस्य श्रोतुर्मन्दमतेरपि ।
सति प्राज्ञैर्विनीतेऽस्मिन् यो व्याख्याति नराधमः ॥ ४४ ॥
भिन्नरत्नत्रयीयानपात्रोऽसौ भूरिगौरवात् ।
विधूतबोधिः संसारवारिराशौ निमज्जति ॥ ४५ ॥ युग्मम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संचिंत्येति स्थितस्थानं तपः कालं गुरुं कुलम् ।
पृष्ट्वा श्रुतं श्रुतं नाम स्वं प्रतिक्रमणादिकम् ॥ ४६ ॥
शयनाशनयानादौ प्रेक्ष्य वृत्तं दिनत्रयम् ।
निश्चित्य गुरुश्चारित्रशुद्धिं तत्सूरिसम्मतः ॥ ४७ ॥
स्वशक्तिमुक्त्वा व्याख्यादौ तद्व्याख्यातं पठेच्छ्रुतम् ।
स्वस्येष्टं प्रश्रयादेतत्पठनं सूत्रसंश्रयः ॥ ४८ ॥ त्रिकम् ।
सविस्तारसमाचारनैकभेदोऽत्र वर्ण्यते ।
उदाहरणमात्रेण विश्वं को वक्तुमीश्वरः ॥ ४९ ॥
रात्रिं दिवं यमिष्वार्ये यत्कर्माचर्यते वरम् ।
तद्विस्तारसमाचार इति येन जिनोदितः ॥ ५० ॥ युग्मम् ।
क्रियाकलापमल्पाल्पसूत्राण्याचारवर्णनम् ।
पठेदथ पुराणानि त्रिकलो स्थितिकीर्तनम् ॥ ५१ ॥
सिद्धांतं तर्कमंगांगबाह्यादेशार्थदेशनम् ।
स्वीयशक्त्यनुसारेण भक्त्या मोक्षैककांक्षया ॥५२॥ युग्मम् ।
रुचिश्चार्वी चरित्राणां शरणं शरणं सताम् ।
महत्त्वसत्त्वगांभीर्यधैर्यादिगुणभूषणः ॥ ५३ ॥
चिरप्रव्रजितो दांतः प्रव्यक्तसमयस्थितिः ।
दयावात्सल्यसाकल्यः शांतोऽयं गणितोचितः ॥ ५४ ॥
इति सूर्यर्पिताचार्यपदः सन् संघसम्मतः ।
प्रायश्चित्तादिशास्त्राणि रहस्यानि पठेदथ ॥ ५५ ॥
यः शिष्यत्वमकृत्वैव सूरितां कर्तुमीहते ।
सः स्यादुन्मार्गगस्तीक्ष्णो वाऽशिक्षिततुरंगमः ॥ ५६ ॥
सर्वसत्त्वगुणिक्लेशिनिर्गुणेषु करोत्वलम् ।
मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि यथाक्रमम् ॥ ५७ ॥
जिनान् सिद्धान् गणाधीशानुपाध्यान्गगद्रुरून् ।
साधून् धर्मं जगच्छर्मकरं वन्देत नेतरान् ॥ ५८ ॥

१ इन्द्रियनिग्रहवान् २ । आचार्यत्वयोग्यः ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

क्षुतार्तौ भयजृंभेष्टार्थारंभस्खलने बुधैः ।
शयने विस्मयादौ च स्मर्तव्यो वृजिनो जिनः ॥ ५९ ॥
सुखेनासीनमव्यग्रं सूरिं वंदेत सम्मुखम् ।
वंदेऽहमिति विज्ञाप्य हस्तमात्रांतरस्थितः ॥ ६० ॥
प्रमृज्य कर्तरीस्पर्शात्माष्टांगान्यवनीमपि ।
पश्चर्द्धशय्ययाऽऽनम्य सपिच्छांजुलिभालकः ॥ ६१ ॥ युग्मम् ।
[1]विगौरवादिदोषेण सपिच्छांजुलिशालिना ।
संदब्जसूर्याऽऽचार्येण कर्तव्यं प्रतिवंदनम् ॥ ६२ ॥
ये दोषान्वेषिणोऽन्येषां सद्गुणावर्णवर्णनाः ।
तपस्विनोऽपि पार्श्वस्था ये च वंद्या न ते यतेः ॥ ६३ ॥
पुरो गुरूणां स्थातव्यं न यथेष्टमकोपयन् ।
तानापृच्छेद्वचस्तेषां प्रतीच्छेत्तत्परो भवेत् ॥ ६४ ॥
हस्तद्वयेन दातव्यं ज्येष्ठेभ्यः पुस्तकादिकम् ।
तत्तद्देयं करद्वन्द्वेनादेयं विनयानतैः ॥ ६५ ॥
नमोऽस्विति नतिः शस्ता समस्तमतसंमता ।
कर्मक्षयः समाधिस्तेस्त्वित्यार्यार्यजने नते ॥ ६६ ॥
धर्मवृद्धिः शुभं शांतिरास्त्वित्याशीरगारिणि ।
पापक्षयोऽस्त्विति प्राहैश्चाण्डालादिषु दीयताम् ॥ ६७ ॥
मान्यः सद्दर्शनी ज्ञानी हीनोऽप्यपरसद्गुणैः ।
वरं रत्नमनिष्पन्नशोभं किं नार्घ्यमर्हति ॥ ६८ ॥
उक्तिः कार्या सहाचार्यैः कार्यार्थं शेषयोगिभिः ।
न मिथ्यादृष्टिभिर्भाज्या श्रावकैः स्वजनैश्च सा ॥ ६९ ॥
स्पृष्टे कपालिचांडालपुष्पवत्यादिके सति ।
जपेदुपोषितो मंत्रं प्रागुद्युत्याशु दंडवत् ॥ ७० ॥
संस्तरावासयोः प्रेक्षा कार्या कल्पास्तकालयोः ।
प्रकाशे सूरिभिः सार्धं वृत्तिश्चावश्यकादिषु ॥ ७१ ॥

---

१ " क्षवः स्त्री क्षुत् क्षुतं क्षवः पुंसि" इत्यमरः । २ ऋद्धिगौरवादिदोषरहितेन । सज्जनकमलदिवाकरेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुनिनैकेन नो वाच्यमेकार्या यदि पृच्छति ।
गणमुख्यां पुरस्कृत्य पृष्टं ब्रूयात्तदीप्सितम् ॥ ७२ ॥
मालालापं कथाश्चार्याजनैः सार्द्धं यमी त्यजेत् ।
तदाश्रयेऽशनं स्थानं व्याख्यानं शयनादिकम् ॥ ७३ ॥
मुनिनैकाकिनैकान्ते न स्थातव्यं कदाचन ।
योषिज्जनागमे काले सदाचारयशोऽर्थिना ॥ ७४ ॥
नामाऽप्यानन्दनिष्यन्दि "स्त्रीति" लोचनगोचरम् ।
तदंगमंगजस्फारशरोग्रं न करोति किम् ॥ ७५ ॥

किं च,

स्त्रीणां दर्शनमादरेक्षणमतो वार्त्तेष्टवार्त्ता मनाङ्-
नर्मोक्तिर्नतिनर्मरत्यनुगवाक् शृंगारसारं वचः ।
स्वान्तस्योल्लसनं धृतेः क्षितिरतिप्रीतिर्मतेर्भ्रान्तिता
तस्यां च स्मरवीरविशिखव्रातस्य लक्षः क्षणात् ॥ ७६ ॥

चिरप्रव्रजितः सूरिः स्थविरः श्रुतपारगः ।
तपस्वीति यतो नास्ति गणना विषमायुधे ॥ ७७ ॥
विधवां लिंगिनीं[1] कन्यां स्वैरिणीं गणिकादिकाः ।
आसजन्नचिराद्भिक्षुरपवादैकमन्दिरम् ॥ ७८ ॥
संवृतांगोऽतिगंभीरो जिताखिलपरीषहः ।
ज्ञानचारित्रवान् सूरिरार्याणां मितभाषणः ॥ ७९ ॥
आज्ञाभंगादिदोषार्हः करोति यदि सूरिताम् ।
मदोदयाद्गुणव्रातैर्नैतेन रहितो यतिः ॥ ८० ॥
लज्जाविनयवैराग्यसदाचारादिभूषिते ।
आर्यावाते समाचारः संयतेष्विव किन्विह ॥ ८१ ॥
द्व्याद्याः समं वसंत्यार्या गृहस्था संकराश्रये ।
तद्गृहानतिदूरातिसमीपेऽवद्यवर्जिते ॥ ८२ ॥
मौनेनाटंति भिक्षार्थं वृद्धार्यान्तरिता गृहान् ।
अन्योन्यपरिरक्षानुकूलवृत्तिपरायणाः ॥ ८३ ॥
अन्यदावश्य गन्तव्यं धर्मकार्यं गृहेऽस्ति चेत् ।
गणिन्यादेशतो यांति द्व्याद्याः सार्धं न चान्यथा ॥ ८४ ॥

१ गणिनीं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमन्ति सूर्युपाध्यायसाधूनार्या यथाक्रमम् ।
पंचषट्सप्तहस्तान्तरालस्थाः पशुशय्यया ॥ ८५ ॥
कर्मभूद्रव्यनारीणां नाद्यं संहननत्रयम् ।
वस्त्रादानाच्चरित्रं च तासां मुक्तिकथा वृथा ॥ ८६ ॥
यदि स्त्रिरत्नमात्रेण सा पुंसां नग्नता वृथा ।
तिरश्चामपि दुर्वारा निर्वाणान्निरलिंगिता ॥ ८७ ॥
मुक्तिश्चेदस्ति किं नासां प्रतिमाः स्तवनान्यपि ।
क्रियन्ते पूज्याश्चेत्तासां मुक्तेर्दत्तो जलांजुलिः ॥ ८८ ॥
देशव्रतान्वितैस्तासामारोप्यन्ते बुधैस्ततः ।
महाव्रतानि सज्जातिज्ञप्त्यर्थमुपचारतः ॥ ८९ ॥
ऋतौ स्नात्वा तु तुर्येह्नि शुद्धचैत्यरसभुक्तयः ।
कृत्वा त्रिरात्रमेकान्तरं वा सज्जपसंयुताः ॥ ९० ॥
गानाक्रन्दनसन्मार्जनाद्यवद्यक्रियोज्झिताः ।
जातिकीर्त्यकिंचिताचाराश्चार्वीक्षान्त्यार्जवान्विताः ॥ ९१ ॥
अविकारवस्त्रवेषाः स्वकीयकायेऽपि निःस्पृहा नित्यम्
पठनपरिवर्त्तनाऽऽख्यानादिश्रुतभावनानिरताः ॥ ९२ ॥

चरंति ये चारुचरित्रसंपदः
पदं समाचारमिमं यमीशिनः ।
समाश्रयंतेऽभ्युदयप्रमोदिनः
परां श्रियं ते कृतिलोकनंदिनः ॥ ९३ ॥

श्रीमान् जिनः संभृतधर्मचक्रः
श्रुतैर्युतः सारगुणैरवक्रः ।
मनोरथानन्यै हतचक्रिचक्रो
भूयादरः पालितधर्मचक्रः ॥ ९४ ॥

इति श्रीवीरनंदिसिद्धांतिचक्रवर्त्तिप्रणीते श्रीआचारसारनाम्नि ग्रंथे द्वितीयोऽधिकारः ॥ २ ॥

---

१ " प्रवीणनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः वैज्ञानिकः कृतमुखः कृती कुशल इत्यमरत्वान्निपुणजनसंतोषकारिण इति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ तृतीयाधिकारः ॥ ३ ॥



श्रियः प्रियः संमतविश्वरूपः
सुदर्शनश्छिन्नपरावलेपः ।
दद्यादनन्तः प्रणतामरेन्द्रो
रमां ममाद्य परमां जिनेन्द्रः ॥ १ ॥

दर्शनज्ञानचारित्रतपोवीर्यविशेषतः
पंचभेदांचिताचारे तावदाद्यो निगद्यते ॥ २ ।
रुचिराप्तागमार्थानां दर्शनं मूढवर्जितम् ।
प्रशमादियुगष्टांगं निसर्गाधिगमोद्भवम् ॥ ३ ॥
व्यपेताऽशेषदोषो यः शरीरी तत्त्वदेशकः ।
समस्तवस्तुतत्त्वज्ञः सः स्यादाप्तः सतां पतिः ॥ ४ ॥
आप्तोक्तिजार्थविज्ञानमागममस्तद्वचोऽथ वा ।
पूर्वापराविरुद्धार्थं प्रत्यक्षादैरबाधितम् ॥ ५ ॥
स्याज्जीवः पुद्गलो धर्मोऽधर्मः कालो नभोऽपि च ।
मानेनार्थ्यत इत्यर्थस्तत्त्वं चार्थः स्वरूपतः ॥ ६ ॥
स्थित्युत्पत्तिव्ययात्मा द्रवति द्रोष्यत्यदुद्रवत् ।
स्वपर्यायानिति द्रव्यमर्थस्तान्तान्विवक्षितान् ॥ ७ ॥
गुणपर्ययवद्द्रव्यं स्याद्द्रव्यान्वयिनो गुणाः ।
निर्गुणाश्चेतनाद्यास्ते तद्विशेषास्तु पर्ययाः ॥ ८ ॥
जीवत्यजीवीज्जीविष्यतीति जीवश्चिदात्मना ।
ज्ञाता द्रष्टा जगन्मात्रदेशोऽमूर्त्तश्च निर्वृतः ॥ ९ ॥
कर्त्ता स्वकर्मणो भोक्ता तत्फलस्योर्ध्वगः क्षयात् ।
तस्य स्वगात्रमात्रश्च स्याद्विसर्पणसंहृतेः ॥ १० ॥
मुक्तसंसारिभेदोऽयं मुक्तः कृत्स्नैनसोत्ययात् ।
हेमोपलो मलान्मुक्त्या हेम स्यादमलं यथा ॥ ११ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनादिकर्मसंतानसंश्लेषात् क्लेशभाजनम् ।
संसारी स्यात्रसस्थावरादिभेदैरनेकधा ॥ १२ ॥
अणुश्च पुद्गलोऽभेद्यावयवः प्रचयशक्तितः ।
कायश्च स्कन्धभेदोत्थश्चतुरस्रस्त्वतीन्द्रियः ॥ १३ ॥
बिभ्रदेकं रसं गन्धं वर्णं शीतचतुष्टये ।
स्पर्शौ चाबाधकौ स्पर्शादेकदा सर्वदेदृशः ॥ १४ ॥
द्व्यणुकादिमहास्कंधपर्यन्तानंतपर्ययाः ।
परमाणोर्विभावाः स्युर्भेदसंघातसंभवाः ॥ १५ ॥
स्निग्धरूक्षत्वतो बंधो जघन्यगुणवर्जिते ।
गुणे समेऽसमे वाण्वोः सर्वत्र स्निग्धरूक्षयोः ॥ १६ ॥
द्व्यविभागप्रतिच्छेदविहीनेन तु बंधनम् ।
स्निग्धाणुनास्य स्निग्धाणोः स्वजातैं रूक्षयोस्तथा ॥ १७ ॥
स्कन्धदेशप्रदेशाणुभेदो वाऽखिलपुद्गलः ।
स्कन्धो ज्येष्ठमहास्कन्धः स्यादन्यश्च धरादिकः ॥ १८ ॥
अतो हीनाणुतो यावदर्द्धं देशास्ततः क्रमात् ।
हीनाणुर्द्व्यणुको यावत्प्रदेशोऽणुः पुरोदितः ॥ १९ ॥
जीवपुद्गलजालस्य व्रजतः स्वेन हेतुना ।
धर्मो याननिमित्तं स्याज्जलं वा जलचारिणाम् ॥ २० ॥
स्वहेतुस्थितिमज्जीवपुद्गलस्थितिकारणम् ।
अधर्मोऽध्वनि खिन्नस्य ग्रीष्मे छायेव शीतला ॥ २१ ॥
धर्माधर्मौ जगद्व्याप्यारूपिणौ सर्वदा स्थितौ ।
कालाणवो जगन्मात्राश्चैवं तु मणिराशिवत् ॥ २२ ॥
ते प्रत्येकं विवर्त्तानिहेतवः सर्ववस्तुनः ।
गौणकालस्तु पर्यायस्थितिः स्यात्समयादिका ॥ २३ ॥
व्योमामूर्त्तं स्थितं नित्यं चतुरस्रं समं घनम् ।
भावावगाहहेतुश्चानंतानंतप्रदेशकम् ॥ २४ ॥
अस्तिकाया इमे कालं विना संतः प्रदेशिनः ।
कायवद्येन कालो प्रदेशप्रचयशक्तिमान् ॥ २५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाजीवौ तयोः पुण्यं पापमास्रवसंवरौ ।
निर्जराबन्धमोक्षाश्चेत्यर्था नवविधाश्च ते ॥ २६ ॥
जीवाजीवौ पुरो प्रोक्तौ सम्यक्त्ववृत्तज्ञानवान् ।
जीवः पुण्यं तु पापं स्यान्मिथ्यात्वादिकलंकवान् ॥ २७ ॥
स्याद्जीवात्मकं पुण्यं पापं चाणुकदम्बकम् ।
शुभानामशुभानां च कर्मणा सुखदुःखदम् ॥ २८ ॥
मिथ्याविरतिकषाययोगाः स्युरशुभास्रवाः ।
दयादमयमाद्यास्तु जीवात्मानः शुभास्रवाः ॥ २९ ॥
उदयोदीरणाकर्मद्रव्यास्रवो यतः ।
स्यान्नूत्नद्रव्यभावैर्नो भावद्रव्यास्रवाः क्रमात् ॥ ३० ॥
भावद्रव्यास्रवानल्पविकल्पेषु यदाऽऽत्मनि ।
यस्य यस्य निरोधः स्यात्तत्तत्संवरणं तदा ॥ ३१ ॥
भावद्रव्यास्रवद्वन्द्वरोधात्संवरणं मतम् ।
द्रव्यभावास्रवद्वन्द्वस्यैतद्यत्तेन जन्यते ॥ ३२ ॥
गलनं निर्जरांशस्य स्याच्चिरंतनकर्मणः ।
सविपाकाऽविपाका च प्राप्तकाला विपाकजा ॥ ३३ ॥
परिणामविशेषोत्थाऽप्राप्तकालाऽविपाकजा ।
कालेनोपायजालैर्वा फलपाको वनस्पतेः ॥ ३४ ॥ युग्मम् ।
रागादीनां विभावानां विश्लेषो भावनिर्जरा ।
आत्मनो गलनं द्रव्यकर्मणां द्रव्यनिर्जरा ॥ ३५ ॥
सम्यक्त्वदेशचारित्रसंयमाऽयोगवृत्तयः ।
कारणं निर्जरायाः स्युः संवरस्यापि कर्मणः ॥ ३६ ॥
द्रव्यास्रवजामिथ्यात्वयोगाविरमणादिभिः ।
नूतनैरात्मनः श्लेषो भावबन्धस्तदात्मता ॥ ३७ ॥
भावास्रवातितापात्मलोहस्यात्मैकदेहगम् ।
आदत्ते सर्वतोऽनंतानंतकर्माणुजीवनम् ॥ ३८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मनस्तेन संश्लेषो द्रव्यबन्धश्चतुर्विधः ।
सः स्यात्प्रकृतिप्रदेशानुभागस्थितिभेदतः ॥ ३९ ॥
प्रकृतिप्रदेशयोः स्याद्योगात् स्थित्यनुभागयोः ।
बंधः कषायतो योगे चाकषाये यतो न तौ ॥ ४० ॥
भावद्रव्यात्मकाशेषकर्मनोकर्मणां क्षयात् ।
भावद्रव्यात्मको मोक्षश्चारुचारित्रसम्पदा ॥ ४१ ॥
अनंतज्ञानदृग्वीर्यसौख्यात्मस्वात्मलंभनम् ।
सिद्धिर्नाभावचिन्मात्रनिःशेषात्मगुणक्षया ॥ ४२ ॥
सप्त तत्त्वानि चैतेऽर्थाः पुण्यपापद्वयं विना ।
तज्जीवाजीवद्रव्यान्तर्भूतं यन्नैगमान्नयात् ॥ ४३ ॥
लोकान्यदेवपाखंडिवेदाद्यासादितादलम् ।
मूढादपोढं सम्यक्त्वं बाढं दृढमिदं भवेत् ॥ ४४ ॥
गेहभक्ताग्निभूस्वर्णरत्नास्त्राद्यपकारकम् ।
अनस्य वस्तु यत्तत्र वंद्यधीर्लोकमूढता ॥ ४५ ॥
ब्रह्मोमापतिगोविन्दशाक्येन्दुतपनादिषु ।
मोहकादंबरीमत्तेष्वाप्तधीर्देवमूढता ॥ ४६ ॥
पाखंडिमूढता दंडपात्रामत्रादिसंगिषु ।
सन्मतिः स्वागमाभासभ्रान्तस्वान्तान्यलिंगिषु ॥ ४७ ॥
पापोपदेशवेदान्यपुराणादिषु सन्मतिः ।
स्याद्वेदमूढता जंतोः संसृतिभ्रान्तिकारणम् ॥ ४८ ॥
गुणाः प्रशमनिर्वेगसंवेगास्तिकतादयः ।
स्वदोषगर्हानिन्दाद्याः सम्यक्त्वमणिरश्मयः ॥ ४९ ॥
निःशंकत्त्वमकांक्षत्त्वं नैर्जुगुप्स्यममूढता ।
उपगूहः स्थितीकारो वात्सल्यं च प्रभावना ॥ ५० ॥

१ कापिशायनम् २ जुगुप्सारहितत्वं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यष्टांगानि पुष्टानि सम्यक्त्वगुणसंपदे ।
यद्वदंगानि सप्त स्युः प्राज्यसाम्राज्यसंपदे ॥ ५१ ॥ युग्मम् ।
हेतुद्वयोत्थकार्यानुमेयेयं भवितव्यता ।
दुर्लभ्येति भयाऽभावो निःशंकत्वं भयोदये ॥ ५२ ॥
भयमाकस्मिकं पारलौकिकं चैहलौकिकम् ।
मृत्युगुप्तिरुजात्राणैः संजातमिति सप्तधा ॥ ५३ ॥
किं स्यात्सत्यमिदं नो वेत्यात्तोक्ते संशयोज्झिता ।
मतिस्तत्त्वाचलप्रीतिः परा निःशंकिता मता ॥ ५४ ॥
वांछाऽभावोऽन्यदृग्ज्ञानवृत्तोत्कर्षेष्वकांक्षता ।
अत्राऽमुत्र च जाते वाऽनश्वरेन्द्रियजे सुखे ॥ ५५ ॥
देवेन्द्रादिश्रियो यस्मिन्सत्यायान्ति स्वयं सताम् ।
सम्यक्त्वेऽनुपमे तस्मिन् किं तया परचिन्तया ॥ ५६ ॥
तीव्रं जैनतपस्तत्र निंद्यं चामज्जनादिकम् ।
सम्यगन्यदिति स्वांतत्यागः स्यान्निर्जुगुप्सता ॥ ५७ ॥
रत्नत्रयपवित्राणां छर्दिलालाद्यपोहने ।
विचिकित्सात्ययो वा सा ज्ञात्वा गात्रापवित्रताम् ॥ ५८ ॥
बहिराचारचारूणि सौगतादिगतान्यलम् ।
क्लेशादिमोहदान्येव स्युः किंपाकवदंगिनाम् ॥ ५९ ॥
तदन्यज्ञानविज्ञानप्रशंसाविस्मयोज्झिता ।
युक्तियुक्ताजिनोक्ते या रुचिः साऽमूढता मता ॥ ६० ॥
यद्वत्पुत्रकृतं दोषं यद्वान्माता निगूहति ।
तद्वत्सद्धर्मदोषोपगूहः स्यादुपगूहनम् ॥ ६१ ॥
आत्मनोऽन्यस्य वा चेतो धर्माद्विघ्नं परीषहैः ।
संबोध्य तत्र तच्चित्तस्थापनं स्यात्स्थितिक्रिया ॥ ६२ ॥
तत्रियोज्य यथाशक्ति धर्मे नूत्नेतरान्नरान् ।
धर्मोपबृंहणं कार्यं न धर्मो धार्मिकैर्विना ॥ ६३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रीतिर्जिनागमे वत्सलत्वं संघे चतुर्विधे ।
प्रमोदितोपकारित्वं चोपकारानपेक्षया ॥ ६४ ॥

जैनानापद्गतांस्तस्मादुपकुर्वन्तु सर्वथा ।
यः समर्थोऽप्युपेक्षेत सः कथं समयी भवेत् ॥ ६५ ॥

त्रिरत्नैरात्मनः सम्यग्भावनं स्यात्प्रभावनम् ।
सद्धर्मस्य प्रकाशो वा सम्यग्ज्ञानादिभिर्गुणैः ॥ ६६ ॥

तेन ज्ञानप्रभावेन महताऽनशनादिना ।
महापूज्यादिभिश्चोच्चैः कर्त्तव्या समयोन्नतिः ॥ ६७ ॥

जडात्मा शक्तियुक्तोऽपि यः सद्धर्मप्रकाशनम् ।
कुर्यान्न चेदसौ रिक्तो महीभारो नराधमः ॥ ६८ ॥

जिनबिंबावलोकादिनिसर्गोऽल्पप्रयासतः ।
ज्ञेयश्चाधिगमस्तत्त्वविचारचतुरा मतिः ॥ ६९ ॥

संज्ञिपर्याप्तभव्यस्य लब्धियुक्तस्य जाग्रतः ।
ज्ञानोपयोगिनो हेतू सम्यक्त्वाप्तेर्मताविमौ ॥ ७० ॥

दृङ्मोहोपशमध्वंसक्षयोपशमकारणैः ।
भवच्छेदनिदानाद्यं दर्शनं त्रिविधं विदुः ॥ ७१ ॥

दर्शने निर्मला वृत्तिर्ज्ञानचारित्रसंपदः ।
पदे मुक्तिरमादर्शे दर्शनाचार ईरितः ॥ ७२ ॥

एतद्देवनरेश्वरामृतपदश्रीवश्यकृद्दर्शनं
किं चानंतभवान्तकृत्परमतत्प्रोन्मेषपूतात्मनः ।
कांतासु त्रिषु भावनादिषु महीषट्टे च वंशादिके
नोत्पत्तिर्विकलेन्द्रियैककरणे बद्धायुषोऽप्यंगिनः ॥ ७३ ॥

ज्ञानं येन समस्तवस्तुविषयं चारित्रमेनोलता-
दात्रं येन पवित्रिताः सुकृतिनो येनाऽस्तु तद्दर्शनम् ।
मच्चेतःशरणप्रकाशनमणिर्यन्नूत्नचिन्तामणि-
र्भव्यानां यदचिन्तितामितफलैर्नित्यप्रमोदोदयम् ॥ ७४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रियं त्रिलोकीपतिपुष्पदन्तः
पुष्यादनंतः प्रियमुक्तिकान्तः ।
दुरंतमिथ्यात्वतमस्तमोरि–
र्जिनो मनोजद्विरदद्विपारिः ॥ ७५ ॥

इति श्रीमद्वीरनंदिसिद्धांतिचक्रवर्तिप्रणीते श्रीआचारसारनाम्नि शास्त्रे दर्शनाचारवर्णनात्मकस्तृतीयोऽधिकारः । ३ ।

अथ चतुर्थाधिकारः ।

जयत्यनंताप्रतिमप्रबोध–
प्रद्योतविद्योतितविश्वतत्त्वः ।
प्रत्यस्तकर्मोरुतमःप्रतानः
प्रोद्बुद्धभव्याब्जवनोऽजितेनः ॥ १ ॥

जानाति ज्ञास्यत्यज्ञासीदनेन 'ज्ञ' इति स्मृतम् ।
ज्ञानं स्याद्भूतनात्मार्थव्यवसायनिराकृतिः ॥ २ ॥

ज्ञेयं हि वस्तु सामान्यविशेषात्मकमत्र यत् ।
सामान्यमूर्ध्वता तिर्यक् चेति भेदद्वयं मतम् ॥ ३ ॥

यत्परापरपर्यायव्यापि द्रव्यं तदूर्ध्वता ।
मृद्यथा स्थासकोशादिविवर्त्तपरिवर्त्तिनी ॥ ४ ॥

---

१ कामदेवेभपद्मानन: २ अजितसूर्यः अत्र रूपकालंकारः ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

परिणामः समस्तिर्यग् खंडमुंडादिगोषु वा ।
गोत्वं विशेषः पर्यायव्यतिरेकद्विभेदवान् ॥ ५ ॥

एकस्य वस्तुनो भावाः पर्यायाः क्रमभाविनः ।
तोषरोषादयो भावा जीवे वा क्रमभाविनः ॥ ६ ॥

व्यतिरेको भवेद्भावो वस्त्वंतरगतोऽसमः ।
गोमहिष्यादिभावो यो यथा तद्व्यतिरेचकः ॥ ७ ॥

ज्ञानं मतिश्रुतावधिमनःपर्ययकेवलैः ।
भिन्नहेतुस्वरूपार्थैर्भेदैः पंचविधं च तत् ॥ ८ ॥

स्वस्यार्थव्यंजनावग्रहेहनाऽवायधारणाः ।
मननं मतिरर्थस्य यत्तदिन्द्रियमानसैः ॥ ९ ॥

व्यंजनावग्रहश्चक्षुर्मनसोर्नास्त्यवग्रहः ।
विषयाक्षसन्निपातानंतराद्यग्रहः स्मृतः ॥ १० ॥

प्राप्ताप्तार्थबोधावग्रहो व्यंजनार्थयोः ।
रसरूपपरिज्ञाने रसनानेत्रयोर्यथा ॥ ११ ॥

अवग्रहगृहीतार्थविशेषे हीहनं मतम् ।
संशयांशविनाशोद्यन्निर्णयावयवं यथा ॥ १२ ॥

नरस्यावगृहीतस्य कर्णाटादिविशेषणैः ।
भवितव्यमनेनेति विज्ञानं निर्णयावधिः ॥ १३ ॥

ईहितार्थस्थलिंगैर्यस्तद्विशेषविनिश्चयः ।
अवायो लाट एवायमिति भाषादिभिर्यथा ॥ १४ ॥

कालान्तरे परिज्ञातवस्तुस्मरणकारकः ।
संस्कारो यस्तदुत्पत्तिकारणं धारणाह्ययम् ॥ १५ ॥

---

१ हि ईहनमिति पदच्छेदः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते बहुबहुविधक्षिप्रानिसृतानुक्तध्रुवाः ।
प्रत्येकं सेतराश्चेति द्वादशावग्रहादयः ॥ १६ ॥

बह्वेकव्यक्तिविज्ञानं बह्वेकं च क्रमाद्यथा ।
बहवस्तरवः सूपो बहुश्चैकं वनं नरः ॥ १७ ॥

बह्वेकजातिविज्ञानं स्याद्बह्वेकविधं यथा ।
वर्णा नृणां बहुविधा गौर्जातिरेकविधेति च ॥ १८ ॥

आश्वर्थस्य ग्रहः क्षिप्रं स्यादक्षिप्रं शनैर्ग्रहः ।
मृत्पात्रं यद्वदादत्ते नूनं चानूनतं जलम् ॥ १९ ॥

वस्त्वंशाद्वस्तुनस्तस्य वस्त्वंशाद्वस्तुनोऽथवा ।
तत्रासन्निहितान्यस्याऽनिसृतं मननं यथा ॥ २० ॥

घटार्वाग्भागकं न्यास्य गवयग्रहणक्षणे ।
स्फुटं घटेन्दुगोज्ञानमभ्याससमयान्विते ॥ २१ ॥

वस्त्वेकदेशमात्रस्य विज्ञानं निसृतं मतम् ।
घटार्वाग्भागमात्रेऽपि क्वचिज्ज्ञानं हि दृश्यते ॥ २२ ॥

प्रत्यक्षनियताऽन्याद्यगुणार्थैकाक्षबोधनम् ।
अनुक्तमेकदैवोक्तं प्रत्यक्षनियतग्रहः ॥ २३ ॥

चक्षुषा दीपरूपावलोकावसर एव यत् ।
तदुष्णस्पर्शविज्ञानं यथोक्तार्थैः प्ररूप्यते ॥ २४ ॥

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं मनश्च खम् ।
अर्थैः स्पर्शो रसो गंधा रूपं शब्दः श्रुतादयः ॥ २५ ॥

स्यान्नित्यत्वाविशिष्टस्य स्तंभादेर्ग्रहणं ध्रुवः ।
विद्युदादेरनित्यत्वेनान्वितस्याध्रुवो ग्रहः ॥ २६ ॥

लब्धिः सदोपयोगश्च स्याद्भावेन्द्रियमात्मनः ।
निवृत्त्युपकरणे द्वे स्तो द्रव्येन्द्रियमत्र तु ॥ २७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यंत्ररचना ।

स्पर्शदंडं	एकेन्द्रियम् ४००	द्वीन्द्रियम् ८००	त्रीन्द्रियम् १६००	चतुरिन्द्रियम् ३२००	असंज्ञिपंचेंद्रियं ६४००	सं. पं. योजन ९
	रसनादंडं	६४	१२८	२५६	५१२	योजन ९
		घ्राणदंडं	१००	२००	४००	योजन ९
			चक्षुर्योजनानि	२९५४	५९०८	४७२६३ ९ ६
				श्रोत्रदंडं	८०००	योजन १

चित्राधैद्धतिमुक्तकमसूरियवनालिकाः ।
अनुकुर्वती च बाह्या निर्वृत्तिः स्पर्शनादिषु ॥ २८ ॥
चतुःशतानि चापानां चतुःषष्टिः शतं क्रमात् ।
योजनत्रिसहस्राणि षट्चत्वारिंशता विना ॥ २९ ॥
धनुरष्टसहस्राणि क्षेत्रात्मा द्विगुणो वरः ।
एकेन्द्रियाद्यसंज्ञ्यंते विषयः स्पर्शनादिषु ॥ ३० ॥ युग्मम् ।
योजनानि त्रिषु नव श्रोत्रोंऽकस्थानकक्रमात् ।
त्रिषट् द्विसप्त चत्वारि चासौ द्वादशसंज्ञिषु ॥ ३१ ॥
स्थूलवाग्गोचरानंतरार्थस्य स्थायिनश्चिरम् ।
प्रत्यक्षं नियतस्यैतद्बोधादभिनिबोधनम् ॥ ३२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्शनादिमतिज्ञानावृत्तिवीर्यान्तराययोः ।
क्षयोपशमजं नाना भेदमेतदुदाहृतम् ॥ ३३ ॥
श्रुतं मतिगृहीतार्थशब्दैरन्यार्थबोधनम् ।
धूमादेः पावकादेर्वा बोधोऽग्नेरग्निशब्दतः ॥ ३४ ॥
तत्पर्यायाक्षरपदसंघातप्रतिपत्तिका ।
अनुयोगः प्राभृतप्राभृतं च प्राभृतं क्रमात् ॥ ३५ ॥
वस्तुपूर्वं समासाश्चामीषामिति समन्वितम् ।
श्रुतं विकल्पविंशत्या स्वान्तस्थान्यविकल्पया ॥ ३६ ॥
श्रुतावरणवीर्यान्तरायमन्दोदयाच्छ्रुतम् ।
स्यादसंख्यजगन्मात्रं पर्यायादिप्रभेदतः ॥ ३७ ॥
मूर्त्तमर्थं मितं क्षेत्रकालभावैरवस्फुटम् ।
मितैर्दैधात्यवधिर्बोधो भवगुणोद्भवः ॥ ३८ ॥
सुरनारकपर्याप्तभवजः प्रथमोऽपरः ।
मर्त्यतिर्यक्षु सम्यक्त्वगुणादीनां विशेषजः ॥ ३९ ॥
स्याद्देशपरमसर्वावधिभेदत्रयोऽवधिः ।
सामान्यस्तत्र देशावधिः स्याद्गुणभवोद्भवः ॥ ४० ॥
शेषौ चरमांगमुनेर्गुणजौ प्रतिपात्यपि ।
तत्र देशावधिर्बोधो शेषावप्रतिपातिनौ ॥ ४१ ॥
वर्द्धमानानुगावस्थितेतरप्रविकल्पतः ।
षट्प्रकारोऽप्यसंख्यातलोकमात्रो विशेषतः ॥ ४२ ॥
सुरनारकतीर्थेश्वरादौ सर्वांगसंभवः ।
अन्येष्वंगप्रशस्ताप्रशस्तचिह्नभवोऽवधिः ॥ ४३ ॥
घर्मायां योजनं क्रोशाद्धीनं तत्क्रमशोन्तिमा ।
यावत्पृथ्वी मतं क्षेत्रमवधिर्निरयेष्विति ॥ ४४ ॥
तिर्यक्ष्वोघजघन्यादातेजोलंभान्मतोऽवधिः ।
नरेष्वोघविकल्पोघो यथायोग्यं भवेदयम् ॥ ४५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भौमभावनयोर्योजनानि स्युः पंचविंशतिः ।
जघन्यक्षेत्रं ज्योतिष्के ततः संख्यातसंगुणम् ॥ ४६ ॥
असुरेष्वसंख्यकोट्यः स्युरुत्कृष्टमपरेषु तु ।
ज्योतिष्कान्तेष्वसंख्यातसहस्राणि ततः क्रमात् ॥ ४७ ॥
द्विर्द्विश्चतुश्चतुर्द्विर्द्विर्नव चतुर्दशस्वपि ।
कल्पेषु स्याद्विमानेषु कल्पातीतेषु चावधेः ॥ ४८ ॥
अधो घर्मादि लोकान्तादारभ्य त्रसनालिकम् ।
क्षेत्रमूर्ध्वं वरक्षेत्रं स्वस्वलोकान्तसंस्थितम् ॥ ४९ ॥ त्रिकम् ।
अयं स्यादवधिबोधावृतिवीर्यान्तराययोः ।
क्षयोपशमतो बोधोऽसंख्यलोकविकल्पतः ॥ ५० ॥
स्यादेतत्त्रयमज्ञानं मिथ्यानंतानुबन्धिनाम् ।
उदयेनाऽऽशु कटु वा कटुलाबुगतं पयः ॥ ५१ ॥
मनो देशावधेर्ज्ञेयं मध्यमं चिन्तितादिकम् ।
परैः पर्येति तद्यत्तन्मनःपर्ययबोधनम् ॥ ५२ ॥
ऋजुविपुलमती तद्भेदावाद्या त्रिभेदगा ।
ऋजुकायवाक्यचेतोगतार्थविषयत्वता ॥ ॥ ५३ ॥
ऋज्वऋजुदेहवाक्यस्वान्तस्वार्थावबोधनात् ।
विपुलमतिः षड्भेदाऽसंख्यकल्पमिता च सा ॥ ५४ ॥
मनःपर्ययविज्ञानावृतिवीर्यान्तरायगोः ।
जातं मन्दोदयावेतत्क्षायोपशमिकं ततः ॥ ५५ ॥
त्रिकालानंतधर्मात्मानंतवस्तुप्रकाशकम् ।
युगपत्केवलं ज्योतिः करणावरणातिगम् ॥ ५६ ॥
क्षणं प्रत्यक्षरं ज्ञेयैः समं विपरिवर्तते ।
तदेकमुपमातीतं परमानन्दमन्दिरम् ॥ ५७ ॥
परद्रव्येन्द्रियानेकप्रकाशादिवशीकृते ।
मतिश्रुते परोक्षे स्तः प्रत्यक्षमवधित्रयम् ॥ ५८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानेनाक्ष्णोति व्याप्नोतीत्यक्ष आत्मा स्वगोचरम् ।
तमेवाक्षं प्रति गतं प्रत्यक्षमिति वर्ण्यते ॥ ५९ ॥

केवलं वा श्रुतं तत्राशेषवस्तुप्रकाशकम् ।
द्वादशांगांगबाह्यात्माऽस्पष्टं स्पष्टं तु केवलम् ॥ ६० ॥

वाचना पृच्छना चानुप्रेक्षाऽऽम्नायो यथाविधि ।
धर्मोपदेश इत्यादि ज्ञानाचारः श्रुते मतः ॥ ६१ ॥

यत्सूत्रार्थोभयाऽऽख्यानं शिष्याणां विनयान्वितम् ।
मोक्षार्थं वाचना प्रोक्ता कृत्वा शुद्धिं चतुर्विधाम् ॥ ६२ ॥

स्वांगे ज्वराक्षिकुक्षादिवेदनापूयशोणितैः ।
स्रावविण्मूत्रलेपादेर्द्रव्यशुद्धिरसंभवः ॥ ६३ ॥

सा भवेदन्नपानादेः सुस्निग्धस्य सुगन्धिनः ।
मोदकापूपपृथुकप्रभृतेरप्यसेवनम् ॥ ६४ ॥

व्याख्यानस्थानकात्सर्वदिक्षु पंचेन्द्रियांगिनाम् ।
शवार्द्रचर्ममांसास्थिशोणितादेरसंगमः ॥ ६५ ॥

गतात्तृतीयस्वाध्यायादाराद्यः स निगद्यते ।
क्षेत्रशुद्धिरिति क्षेत्रे द्वात्रिंशद्दण्डमात्रके ॥ ६६ ॥

तृतीयकशुष्कचर्मादेर्हस्तद्व्येकशते तदा ।
विण्मूत्रयोः क्रमाद्धस्तशतपंचाशत्करायते ॥ ६७ ॥ त्रिकं ।

पंचाक्षे क्लिश्यमानेऽर्त्या म्रियमाणे च कर्मसु ।
त्रसस्थावरघातेषु सत्स्वेकस्मिन्निवर्त्तते ॥ ६८ ॥

आसन्ने बालचाण्डालजलदीपाग्निलुंचने ।
दवादिधूमे दुर्गन्धे वाति दूरान्न सा भवेत् ॥ ६९ ॥ युग्मम् ।

---

१ साहित्ये प्रथमाद्वितीयपादयोस्तृतीयचतुर्थपादयोः संयोगस्तु भणितः, परन्तु द्वितीयतृतीयपादयोर्नात्र तदर्शनात्साहित्यभंगत्वात् वृत्तदोषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नंदीश्वरमहापूजाराध्यागमनयोजनं —
प्रमाणक्षेत्रसंन्यासमहानशनवासरैः ॥ ७० ॥

सर्वपर्वक्रियावश्यकक्रियावसरादिभिः ।
व्यपेतता भवेत्काले कालशुद्धिर्विशुद्धिदा ॥ ७१ ॥ युग्मम् ।

सप्त त्र्येकदिनान्यत्र स्वग्रामे योजनप्रमे ।
क्षेत्रे दूरे च वर्ज्यानि स्वर्गते श्रमणाधिपे ॥ ७२ ॥

निष्ठाप्य पश्चिमश्यामास्वाध्यायं शुद्धभूस्थितः ।
व्युत्सर्गेणेन्द्रकीनाशप्रचेतोधनिनां दिशः ॥ ७३ ॥

नवार्यापाठकालेन प्रत्येकं शोधयेदयं ।
पूर्वाह्णवाचनाहेतोः कालशुद्धिविधिस्त्वयम् ॥ ७४ ॥

विद्युदिन्द्रधनुःक्षोणीकंपाशादाहसंगरैः ।
महणाकालवृष्ट्यभ्रगर्जनादिविवर्जितः ॥ ७५ ॥ त्रिकम् ।

पूर्वाह्णेऽप्यपराह्णस्य वाचनार्थं विशोधयेत् ।
एवमाशाश्चतस्रस्तु सप्तार्यापाठकालतः ॥ ७६ ॥

कृत्वैवमपराह्णेऽपि पंचार्यापाठकालतः ।
दिक्शुद्धिं वाचनां पूर्वरात्रौ कुर्याद्दिवं पुरा ॥ ७७ ॥

क्षेत्रशुद्धिं विधायैतत्कारणोपायवर्जिते ।
निशायां पश्चिमश्यामावाचना नाऽस्ति संयते ॥ ७८ ॥ युग्मम् ।

व्योमाचलकुलान्तस्थचारणाद्यधिबोधिनाम् ।
वाचना पररात्रौ तु क्षेत्रशुद्ध्युपलंभतः ॥ ७९ ॥

सर्वमासेषु जंघाया छाया सप्तपदी क्रमात् ।
वाचना ग्रहमोक्षेषु स्यात्पूर्वाह्णापराह्णयोः ॥ ८० ॥

---

१ अत्रापि त्रिषष्टितमश्लोकवद्वृत्तदोषः । २ अत्रापि त्रिषष्टितमपद्यवद्वृत्तदोषः वीरनंदिना महाकविनाऽपि एतादृशस्थूलदोषाणां कथमवकाशोऽलंभीत्यत्र संशयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आषाढकृष्णपक्षप्रतिपद्येकपदी तु सा ।
स्वाध्यायमोक्षादानेषु स्यात्पूर्वाह्णापराह्णयोः ॥ ८१ ॥

दिनं प्रत्यंगुलस्यैति यत्पंचदशमांशकः ।
वृद्धिं तच्छ्रावणस्यादौ सा छाया द्व्यंगुलाधिका ॥ ८२ ॥

अंगुलिद्वयवृद्ध्यैवं प्रतिमासं पदद्वयं ।
पौषादौ स्यात्ततः पौषाद्याज्येष्ठांतं तु हीयते ॥ ८३ ॥

यशः पूजापुरस्कारनिःकांक्षा निर्मदा मतिः ।
श्रुतामृतकृतानंदा भावशुद्धिर्मुनेर्मता ॥ ८४ ॥

एवं शुद्धीर्विधायात्महस्तपादं विशोध्य च ।
शुद्धदेशस्थितो भक्त्या क्रियां कृत्वा यथाविधि ॥ ८५ ॥

पल्यंकासनगः सूरिपादं नत्वा कृताञ्जुलिः ।
सूत्रस्याध्ययनं कुर्यात् कक्षाद्यं स्वांगमस्पृशन् ॥ ८६ ॥ युग्मम् ।

यथाकालं ततो मुंचेद्वाचनामीदृशो विधिः ।
पुराणाराधनापंचसंग्रहादिश्रुतौ न हि ॥ ८७ ॥

गणीशोक्तं मतं सूत्रमभिन्नदशपूर्विभिः ।
उक्तं प्रत्येकबुद्धैश्च श्रुतकेवलिभिः श्रुतम् ॥ ८८ ॥

विधिमेनमतिक्रम्य सूत्रं शुश्रूषुराप्नुयात् ।
रुजासमाधिस्वाध्यायभंगार्तीर्निष्फलस्य च ॥ ८९

प्रच्छना संशयोच्छित्यैः प्रभः सप्रश्रयो मुनेः ।
स्वोन्नत्यख्यापनार्थं वा प्रहासोद्धर्षवर्जितः ॥ ९० ॥

अनुप्रेक्षा परिज्ञाते भावना या मुहुर्मुहुः ।
परिवर्त्तनमाम्नायो घोषदोषविवर्जितम् ॥ ९१ ॥

द्वादशांगैकदेशोपदेशो धर्मोपदेशनम् ।
पंचप्रकार इत्येष ज्ञानाचार उपाहृतः ॥ ९२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञोन्मेषः प्रशस्तान्तरंगता कर्मनिर्जरा ।
संख्यातीतगुणश्रेण्या चेत्यादि स्यादितो यतेः ॥ ९३ ॥

वन्दे श्रीजिनमंजुलास्यकमलामोदं श्रुतं विश्रुतं
चार्वी चारुचरित्रपात्रमुनिवृन्देन्दिन्दिरानन्दिनम् ।
यत्पुष्णाति भवेभवेऽप्यमलिनं ज्ञानं समासेवितम्
कैवल्यं च समस्तवस्तुविषयं तद्विस्मृतं यद्यपि ॥ ९४ ॥

गंभीरं मधुरं मनोहरतरं दोषव्यपेतं हितं
कंठौष्ठादिवचोनिमित्तरहितं नो वातरोधोद्भूतम् ।
स्पष्टं तत्तदभीष्टवस्तुकथकं निःशेषभाषात्मकं
दूरासन्नसमं समं निरुपमं जैनं वचः पातु वः ॥ ९५ ॥

येनाऽज्ञानतमस्ततिर्विघटिता ज्ञेये हिते चाहिते
हानादानमुपेक्षणं च समभूत्तस्मिन्पुनः प्राणिनाम् ।
येनेयं द्दगुपैति तां परमतां भूतं च येनानिशं
तज्ज्ञानं मम मानसांबुजमुदे स्तात्सूर्यवर्योदयम् ॥ ९६ ॥

ज्ञानं यदीयं विगतोपमानं
सर्वं यदन्तः परमाणुखर्वम् ।
पायात्स सर्वावृतिजादपाया—
न्नाथस्त्रिलोक्या वरमल्लिनाथः ॥ ९७ ॥

इति श्रीमद्वीरनंदिसिद्धांतचक्रवर्त्तिविरचिते श्रीआचारसारनाम्नि
शास्त्रे ज्ञानाचारवर्णनात्मकश्चतुर्थोऽधिकारः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पंचमोऽधिकारः ।

श्रीसंभवं भजत संचितपुण्यराशे-
र्नुर्येन भीकरतरस्य भवांबुराशेः ।
लीलासमुत्तरणकारणयानपात्रं
प्रोक्तं गुणोत्करनिरास्रवणं चरित्रम् ॥ १ ॥

मनोवचनकायानां पापरूपक्रियात्ययात् ।
पंचप्रकारं चारित्रं स्वस्वरूपमुपैत्यलम् ॥ २ ॥

तत्सामायिकं छेदोपस्थापनं तद्द्वयात्मिका ।
परिहारर्द्धिः स्यात्सूक्ष्मसांपरायश्च संयमः ॥ ३ ॥

यथाख्यातमितीदानीमेषां रूपं निरूप्यते ।
संसारगरलोदारलतोन्मूलनकारिणाम् ॥ ४ ॥ युग्मम् ।

समभेदेन त्यागेनाऽयोऽयनं मतेः ।
समयः स एव चारित्रं सामायिकमुत्तमम् ॥ ५ ॥

व्रतसमितिगुप्तिभेः पंचपंचत्रिभिर्मतेः ।
छेदैर्भेदैरुपात्यर्थं स्थापनं स्वस्थितिक्रिया ॥ ६ ॥

छेदोपस्थापनं प्रोक्तं सर्वसावद्यवर्जने ।
व्रतं हिंसाऽनृतस्तेयाब्रह्मसंगेष्वसंगमः ॥ ७ ॥ युग्मम् ।

हिंसाया हिंस्यतां हिंस्रः प्राप्नोति बहुजन्मसु ।
प्राणिहिंसात्महिंसैव सातस्त्याज्या हितैषिणा ॥ ८ ॥

कषायपरिणामः स्यात्प्राणिप्राणवियोजकः ।
हिंसाहिंसकपापानुबंधबन्धादिकारणम् ॥ ९ ॥

उक्तं च सिद्धान्ते--

स्वयं ह्यहिंसा स्वयमेव हिंसनं न तत्पराधीनमिह द्वयं भवेत् ।
प्रमादहीनोऽत्र भवत्यहिंसकः प्रमादयुक्तस्तु सदैव हिंसकः१०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संरंभसमारंभारंभैः कायवाङ्मनोयोगैः ।
कृतकारितानुमतिभिः क्रोधाद्यैश्च कारणैः ॥ ११ ॥
पूर्वपूर्वेर्युतैः सर्वैः प्रत्येकं सोत्तरोत्तरैः ।
स्याद्दुपर्युपर्यन्योन्याभ्यासेऽष्टोत्तरं शतम् ॥ १२ ॥ युग्मम् ।
संरंभो हिंसनोक्तत्वं हिंसोपकरणार्जनम् ।
समारंभोऽग्निवातादिः स्यादारंभो वयोज्झितः ॥ १३ ॥
कायवाङ्मनसां कर्मयोगः स्वेन कृतं कृतम् ।
स्वप्रयुक्तान्यनिष्पन्नं हिंसनं कारितं मतम् ॥ १४ ॥
अनुमतमनुज्ञातं कषायः कषतीत्यसौ ।
क्रोधो मानश्च माया स्याल्लोभः संयमदर्शने ॥ १५ ॥
परोपघातकृच्चेतो युक्तायुक्तेक्षणक्षयम् ।
क्रोधोंगकंपदाहाक्षिरागवैवर्ण्यलक्षणः ॥ १६ ॥
परोत्कर्ष्यं मनो मानो निर्दयः परमर्दनः ।
स्वोन्नतानत्यहंकारः परासहनलक्षणः ॥ १७ ॥
नानाप्रतारणोपायैर्वंचनाऽऽकुलिता मतिः ।
मायाविनयविश्वासाऽऽभासचेतोहराकृतिः ॥ १८ ॥
परिग्रहग्रहातीवलालसं मानसं स्मृतः ।
लोभो लाभातिमोदान्तरक्षणार्त्तोपलक्षितः ॥ १९ ॥
दयामृतरसास्वादं मानसं स्यादहिंसनम् ।
जनतात्यन्तविश्रंभमैत्रीस्वमोक्षकारणम् ॥ २० ॥
वाङ्मनोगुप्तीर्यादाननिक्षेपसमितीर्विदुः ।
युक्ताः शुद्धेक्षिताद्यादिभुक्त्याऽहिंसनभावनाः ॥ २१ ॥
वचः सत्यमसत्यं वा स्मृतं जीवाहितेहितम् ।
जिह्वाच्छेदादिसर्वस्वहारैनोहेतुरात्मनः ॥ २२ ॥
कृतं सत्यमसत्यं वा वचः प्राणिहितेहितम् ।
येन सन्मानविश्वासयशांसि लभते नरः ॥ २३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्नामस्थापनारूपभावसंवृतिदेशगम् ।
संयोजनाजनपदप्रतीत्यसमयाश्रितम् ॥ २४ ॥

संभावनोपमात्रं चेत्यादि सत्यमनेकधा ।
सोदाहरणमत्रैषां लक्षणं वक्ष्यतेऽधुना ॥ २५ ॥

व्यवहारप्रसिद्ध्यर्थमर्थाभावोऽपि लौकिकैः ।
कृतं नाम मतं नामसत्यं चन्द्रादिवन्नृषु ॥ २६ ॥

धर्मोऽन्यवस्तुनः स्थाप्यतेऽन्यस्मिन्ननुरूपिणि ।
अन्यस्मिन्वा यया मत्या स्थापना सा तया वचः ॥ २७ ॥

सस्त्यं स्यात्स्थापनासत्यं प्रतिबिंबाक्षतादिषु ।
चन्द्रप्रभजिनेन्द्रोऽयमित्यादि वचनं यथा ॥ २८ ॥

रूप्यते दृश्यते प्रायो यत्तद्रूपं तदर्पणम् ।
रूपसत्यं वचः श्वेता बलाकेत्यादिकं यथा ॥ २९ ॥

छद्मस्थज्ञानिनो वस्तुयाथाऽत्म्यादर्शनेऽप्यलम् ।
दृष्टदोषापहारेण गुणपोषणकृन्मनः ॥ ३० ॥

भावस्तेन वचः सत्यं भावसत्यमिदं पयः ।
प्रासुकं नेदमित्यादि वचो वा वृतिगोचरम् ॥ ३१ ॥ युग्मम् ।

या सा सर्वानुमत्या वाक् ख्याता संवृतिसत्यवाक् ।
कारणान्तरजत्वेऽपि पंकेजमिति वाग्यथा ॥ ३२ ॥

सर्वदेशैकवाग्देशसत्यमोदनपाकवाक् ।
यथा वृत्त्या वृतो ग्राम इति ग्रामादिवर्णनम् ॥ ३३ ॥

सेनौषधादिविन्यासविभागक्रमवर्णना ।
वाणी संयोजना चक्रव्यूहैलाद्यादिवाग्यथा ॥ ३४ ॥

नानाजनपदेष्वार्यानार्यभेदेषु यद्वचः ।
धर्मार्थकाममोक्षादिस्वरूपोपायदेशकम् ॥ ३५ ॥

प्रत्येकं नियतं सत्यं स्यात्तज्जनपदाश्रयम् ।
धर्मोदयात्मका राजा राणेत्यादिवचो यथा ॥ ३६ ॥ युग्मम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कंचनार्थं प्रतीत्यान्यस्वरूपान्तरभाषणम् ।
प्रतीत्यसत्यं वीरोऽयं ज्ञानीत्यादिवचो यथा ॥ ३७ ॥
सिद्धान्तः समयस्तेन प्रसिद्धान्तप्ररूपणम् ।
वचः समयसत्यं स्यात्प्रमाणनयसंश्रयम् ॥ ३८ ॥
संभावनेति सोक्ता वाग्वस्तुसद्भावभावना ।
शक्रः शक्नोति तर्जन्योद्धर्तुं मेरुमपीति वा ॥ ३९ ॥
उपमोपमयाऽगुण्यगुण्यादेः परिवर्णना ।
आयुः पल्योपमं ग्रीष्मो वह्निरित्यादि वाग्यथा ॥ ४० ॥
क्रोधभयलोभहास्यत्यागाः सत्यस्य भावनाः ।
अनुवीची वचश्चेदमागमोचितभाषणम् ॥ ४१ ॥
परैरदत्तस्याऽऽदाने मनः स्तेयं यदेनसाम् ।
हेतुरत्राऽपि चौरस्य बधबन्धादिदुःखदम् ॥ ४२ ॥
स्तेयवर्जनमस्तेयं हेतुः स्वर्गापवर्गयोः ।
जनता येन विश्वासप्रीतिख्यातिसुखास्पदं ॥ ४३ ॥
याच्राऽनुज्ञापना पत्युराचानात्मीयभावनाः ।
योग्याऽन्याऽग्राह्यस्यादानमविवादः सधर्मिभिः ॥ ४४ ॥
इत्यस्तेयव्रते पंच भावनाः कन्दरादिषु ।
स्वभावशून्येष्वावासो मुक्तामोचितसद्मसु ॥ ४५ ॥
परोपरोधाकरणं भैक्ष्यशुद्धिः सधर्मिभिः ।
सहाविवाद इत्येवमथ वा पंच भावनाः ॥ ४६ ॥ त्रिकम् ।
वेदतीव्रोदयात्कर्म मैथुनं मिथुनस्य यत् ।
तदब्रह्मापदामेकं पदं सद्गुणलोपनम् ॥ ४७ ॥
येन बद्धा महादेहा रदिनो मदिनोऽप्यलम् ।
करेणुवशगाः क्लेशमाप्नुवन्त्यवशा नरैः ॥ ४८ ॥
यच्चैवं जनतामान्यबालिनां गुणशालिनाम् ।
निदानं मानहान्यादिक्लेशानामिह देहिनाम् ॥ ४९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिह्मान्तःकरणो ब्रह्मा निजपुत्रीमपत्रपः ।
जगाम किल येनार्द्धनारीत्वं च महेश्वरः ॥ ५० ॥

गोविन्दो मन्दधीः प्रीत्या गोपपत्न्या गृहं गतः ।
तयाऽपि च किलात्यन्तं चतुरोक्त्या प्रतारितः ॥ ५१ ॥

किञ्च ।

ब्रह्मा जिह्मितसन्मतिर्बहुमुखः काष्ठेक्षणाद्भीतितः
पार्वत्यास्तनुसंप्रवेशविवशश्चाद्धांगनारी हरः ।
विष्णुर्वारिधिमध्यगो गतधृतिस्तद्दीर्घनिद्रोऽभवत्
त्रैलोक्योन्मथनोत्थमन्मथविभोर्मन्ये शराद्बुधरात् ॥ ५२ ॥

मारापराभिधानेनाब्रह्मणाऽन्येऽपि तादृशाः ।
जाता विडम्बनापात्रमिदं चित्रं हि नो यतः ॥ ५३ ॥

कादम्बरीरसोन्मादं वा हिताहितमोहितम् ।
त्रिवेदोदीरणाभ्रान्तस्वान्तं तद्वदिदं जगत् ॥ ५४ ॥

किञ्च ।

श्रुत्वाऽऽलोक्य न सीधु माद्यति जनः स्पृष्ट्वा च माद्यत्यदः
पीत्वैव श्रवणेक्षणानुभवनैः कान्ताजनानां पुनः ।
लोको मुह्यति चित्रमत्र तु परं प्रभ्रष्टदृष्टिश्रुति–
स्त्यक्त्वा सत्त्वगुणं नयं च विनयं स्यादुर्मतिर्दुर्गतिः ॥ ५५ ॥

वेदाऽश्रुच्छोदयादिच्छा पुंस्त्रीतद्वद्वयसंश्रया ।
स्त्रीपुंनपुंसकानां स्यादब्रह्मैकाकिनामपि ॥ ५६ ॥

तेनानुन्मथितं चेतो यत्तद् ब्रह्मव्रतं स्मृतम् ।
व्रतव्रातलतामूलं मूलं स्वर्गापवर्गयोः ॥ ५७ ॥

यन्माहात्म्यान्महाविद्या सेवोद्या वा वसन्त्यलम् ।
जनेऽप्यसंयते यच्च नाम्ना देवव्रतं मतम् ॥ ५८ ॥

स्त्रीणां रागकथांगावलोकनादरयोः स्मृतिः ।
त्यागः पूर्वं रतस्योच्चैर्वृष्येष्टस्य रसस्य च ॥ ५९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीसंसक्तवसत्यंगसंस्कारपरिवर्जनम् ।
चेति पंच वदन्त्यार्यास्तुरीयव्रतभावनाः ॥ ६० ॥ युग्मम् ।
क्षेत्रं वास्तु धनं धान्यं द्विपदोंगी चतुःपदः ।
यानं शय्याऽऽसनं कुप्यं भांडं चेति बिहिर्दश ॥ ६१ ॥
मिथ्यात्ववेदहास्यादि षट्कषायचतुष्टयम् ।
रागद्वेषौ च संगाः स्युरन्तरङ्गाश्चतुर्दश ॥ ६२ ॥
सचित्ताऽचित्तरूपैतत्संगसंगिपराः परैः ।
मानासुहान्यतिक्लेशानाभुवन्त्यवशाशयाः ॥ ६३ ॥
या मूर्च्छाच्छेदिनी संगे चेतोवृत्तिरसंगता ।
यया साऽऽत्यन्तिकी मुक्तिश्रीरुपैति यतिं स्वयम् ॥ ६४ ॥
स्वात्माऽभ्यन्तररागाद्या यदि त्याज्याः परिग्रहाः ।
बाह्यास्तत्त्वादयः किं नासातसन्ततिकारिणः ॥ ६५ ॥
सेवातन्द्राः सुरेन्द्राद्याः क्रूरो मारश्च किंकरः ।
यस्यामद्भुतमाहात्म्यसंगताऽसंगता ततः ॥ ६६ ॥
परिग्रहग्रहोन्मुक्तेरभ्रान्ता स्वान्तसन्ततिः ।
निजानंदामृतामन्दस्यन्दिनी कैर्न वर्ण्यते ॥ ६७ ॥
स्यान्मनोज्ञामनोज्ञाक्षपंचकार्थेषु वर्जनम् ।
भावनापंचकं रागद्वेषयोरपरिग्रहे ॥ ६८ ॥
महान्तमर्थं मोक्षं यत् साधयन्ति महान्ति तत् ।
व्रतान्याचरितानीति वा महद्भिः सुधीधनैः ॥ ६९ ॥
व्रतत्राणाय कर्त्तव्यं रात्रिभोजनवर्जनम् ।
सर्वथान्नान्निवृत्तिस्तत्प्रोक्तं षष्ठमणुव्रतम् ॥ ७० ॥
रात्रिभुक्तौ व्रतानां स्यान्नाशः शंका च तत्क्षये ।
प्राणितस्याऽऽत्मनो हानिरङ्गयङ्गविषसंगमात् ॥ ७१ ॥
ईर्याभाषैषणादाननिक्षेपोत्सर्गकर्मसु ।
संयत्नादितयः पंचवृत्तयः समितिप्रथाः ॥ ७२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सार्द्रां कर्दमशेवालजलपुष्पफलाविलाम् ।
इलां त्यक्तांकुरानीकप्राणिबीजव्रजाकुलाम् ॥ ७३ ॥
काष्ठेष्टकाष्मलोष्ठादिकृतवर्त्मोऽसमं चलं ।
त्यक्त्वा संशयितं चात्मपातासंयमहेतुकम् ॥ ७४ ॥
मार्गे रथाश्वगोयूथनरादिचरणाहतिः ।
प्रासुकेऽपगताऽऽयातप्राणिप्रालेयजालके ॥ ७५ ॥
प्रभाकरकरव्रातस्पष्टहेयार्थसार्थिनी ।
योगिनस्तीर्थयात्रात्मगुरुकार्यादिभागिनः ॥ ७६ ॥
स्थित्वा कार्यवशान्मन्दं मृगवद्विगिवलोकिनः ।
पुरो युगान्तरे प्राणिवीक्षणार्पितचेतसः ॥ ७७ ॥
मन्दं न्यस्तपदापास्तद्रुतातीवविलंबिनः ।
द्विपेन्द्रमन्दयानस्य स्यादीर्यासमितिर्गतिः ॥ ७८ ॥ षड्भिः ।
सत्यमोषोभयासत्यमोषभेदाच्चतुर्विधा ।
भाषाद्या सत्यबोधार्थवाग्घटे घटवाग्यथा ॥ ७९ ॥
मोषभाषा विपर्यासव्यवसायार्थगोचरा ।
यथा मरीचिकाचक्रे वार्वाक्साऽनेकभेदगा ॥ ८० ॥
धर्मैर्विवक्षितैः सत्येऽसत्ये चार्थैर्विवक्षितैः ।
वाक् प्रवृत्तोभयाख्या सा भाषेतीहेष्यते यथा ॥ ८१ ॥
घटाकृतिव्यपेताया धारणाद्दूरि वारिणः ।
कुंडिकाया घटाख्यैवं बहुभेदमिदं वचः ॥ ८२ ॥ युग्मम् ।
आमंत्रणामाज्ञापनं याच्ञावाक् प्रच्छनावचः ।
प्रज्ञापनावचः प्रत्याख्यानसंशयभाषणम् ॥ ८३ ॥
इच्छाऽनुलोमवचनमनक्षरमयं वचः ।
इत्येवमादयः सत्यमोषभेदाः सहस्रशः ॥ ८४ ॥
तत्रामंत्रणमन्यस्य परत्राऽऽसक्तचेतसः ।
आभिमुख्यकरं हंहो नरेन्द्रेत्यादिकं वचः ॥ ८५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आज्ञापनं प्रभुत्वेनाऽऽदेशो यः स्वोक्तकारिणा ।
तत्किंचिदाशु कर्त्तव्यं यन्मया दिश्यते तव ॥ ८६ ॥
याच्ञा मयाऽर्थितं किंचिद्यत्तद्देयमिति त्वया ।
कथ्यतां यन्मया पृष्टं तदित्याप्रच्छनावचः ॥ ८७ ॥
मत्पृष्टं यत्तदादेश्यमिति प्रज्ञापना गुरौ ।
प्रत्याख्यानमहं किंचित्त्यजामीति निवृत्तिवाक् ॥ ८८ ॥
संशीत्यैतात्किमित्यादि वचः संशयवाङ्मता ।
तवेष्टं पृष्टं कुर्वेहमित्याद्येच्छानुलोमवाक् ॥ ८९ ॥
बालादिसंज्ञ्यसंज्ञ्यंगिवागनक्षरवागिमाः ।
न सत्यं स्पष्टताऽभावान्नासत्यं वाच्यसंभवात् ॥ ९० ॥
मितसत्यहितस्योक्तिर्मनः सन्देहभेदिनः ।
वचसोऽनुभयस्यापि भाषासमितिरिष्यते ॥ ९१ ॥
अपवित्रमिदं गात्रं विण्मूत्रादिमलाविलम् ।
क्षयि न्यक्षोग्ररोगादिपीड़ानीडं जडात्मकम् ॥ ९२ ॥
स्वाहत्वर्यमनेनाऽऽर्यः कथं कुर्याद्वरात्मनः ।
अन्यः स्वान्यपरिज्ञानापेतचेतोहतात्मनः ॥ ९३ ॥
मिताशनादिदानेन नेयः कायस्तथाप्यऽयम् ।
यथा रथोऽक्षसंम्रक्षणेन स्तंभैः कुटुंबिनाम् ॥ ९४ ॥
अप्राप्तावसरेणैषा रक्षणीयो मुमुक्षुणा ।
कायो वहति नो लोकः किं मूर्ध्ना दग्धुमिन्धनम् ॥ ९५ ॥
एतद्रत्नत्रयीपात्रं नांगत्यंगं विनाऽशनम् ।
पुण्यात्तत्तेन सिद्ध्यर्थं स्वार्थभ्रंशो हि मूर्खता ॥ ९६ ॥
मत्वेति द्रव्यदेशात्मदेहप्रकृतिनिश्चितः ।
कालं गवेषणस्यैषणस्य ज्ञात्वाऽर्कचारतः ॥ ९७ ॥
पूर्णोदरचरत्तोकैरगारबलिकर्मणा ।
छायया मुशलध्वानधूमशान्त्यादिकैरपि ॥ ९८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धकायः पुरीषादिमलोत्सर्गविधानतः ।
परिमृष्टात्मपूर्वापरांगभागो विलोक्य च ॥ ९९ ॥
ततः पंच गुरून्नत्वा भूत्वैकाग्रमतिर्यतिः ।
कुर्याच्चर्यां नगर्यादावदीनाननमानसः ॥ १०० ॥
वर्ज्यासमितिभीतिभ्रान्तिप्रीत्यादिवर्जितः ।
भटकुक्कुटडिंभस्त्रीयुद्धनृत्यादिवीक्षणे ॥ १०१ ॥
विहायोल्लंघनं जानुदेशादुन्नतवस्तुनः ।
नाभिनीचं च संकीर्णं द्वारं मार्गं च दुर्गमम् ॥ १०२ ॥
परिहृत्य च दूरेण कासराद्युग्रशृंगिणः ।
कुंजरोष्ट्रतुरंगार्क्षीश्चोन्मत्तश्च नृपोत्रिणः ॥ १०३ ॥
कुलं तलारकारूणां सूनामैरेयकारिणाम् ।
त्यक्त्वा प्रसूतिकाबन्दिवादित्रत्रयजीविनाम् ॥ १०४ ॥
प्रपापण्याङ्गनाऽनाथाऽज्ञातिकाऽभक्तमन्दिरम् ।
वार्यमाणं विवाहादिमंगलं लोकनिन्दितम् ॥ १०५ ॥
यज्ञभोजनशालां च कदर्यमृतकालयम् ।
बन्धं गेहं कवाटादिस्थगितादिकमीदृशम् ॥ १०६ ॥
अतिप्रसंगसंक्लेशावज्ञादुःकीर्त्यसंयमः ।
श्रुतलोकविरोधाद्या यत्स्युस्तद्गेहसंश्रयात् ॥ १०७ ॥
क्रमेण योग्यागारालिं पर्यटन्प्रांगणं मितम् ।
विशेन्मौनी विकारांगसंज्ञायाच्च्यौज्झितो यतिः ॥ १०८ ॥
इन्दोर्वन्द्या गतिर्यद्वन्नक्षत्रक्षेत्रचारिणः ।
तद्वन्मुनेश्च पुण्यानुग्राह्यगेहानुसारिणः ॥ १०९ ॥
यथा वाऽदीनता रत्नदर्शकव्यवहारिणः ।
गात्रदर्शनमात्रात्पकांक्षाभिक्षोस्तथैव सा ॥ ११० ॥
अदीनजैनमार्गस्थः प्राक्प्राप्तिसमाशयः ।
कः किं कुत्र कथं मह्यं दास्यतीतीहनोज्झितः ॥ १११ ॥
अस्थापितो निवर्त्तेत प्रविष्टं मन्दिरादिकम् ।
पुनर्न प्रविशेदन्यग्रामादीश्चाऽज्ञानाशया ॥ ११२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धारयेच्चैव विण्मूत्रवेगं निर्गत्य तं बहिः ।
व्युत्सृजेन्न विशेत्पश्चात्स्वस्थानं धीरधीर्व्रजेत् ॥ ११३ ॥
कुलं विषण्णव्यग्रोग्रतार्क्षकादिकुलाकुलम् ।
सन्मार्जनाद्यवद्यं च वन्द्यमानोऽपि नो विशेत् ॥ ११४ ॥
शृंगारनृत्यचित्रादिशालामुद्यानमिन्द्रिय-।
द्विपेन्द्रक्रीड़नस्थानं स्थानमन्यच्च तादृशम् ॥ ११५ ॥
प्रतिग्रहप्रणामाभ्यां स्थापितो योग्यदातृभिः ।
तर्णकैलकवालादीननुल्लंघ्य विशेद्गृहम् ॥ ११६ ॥
प्रकाशजनसंचारवत्यशुच्यङ्गिवर्जिते ।
विस्तीर्णे संवृते शस्ते सम्मते तत्र संवृतः ॥ ११७ ॥
आत्मोचिताऽऽसनाऽऽसीनो दातृप्रक्षालितक्रमः ।
ऊर्ध्वाधःपार्श्वदिक्कोणनिक्षेपाद्यनिरीक्षणः ॥ ११८ ॥
वर्णी पूर्णप्रतिज्ञोऽथ सिद्धभक्तिं विधाय तत् ।
प्रत्याख्यानं विनिष्ठाप्य प्रेरितो भक्तदातृभिः ॥ ११९ ॥
समांगुलचतुष्कांतरांघ्रिः स्थित्वा समुद्भृते ।
पात्रार्तिपिंडे करद्वन्द्वमानाभेर्धौतमुत्क्षिपेत् ॥ १२० ॥
पुटं पाण्योरभित्वाऽन्यक्षितं भुंजीत तं मतं ।
विना विकारवेगार्त्तिमांद्याऽऽसक्तिस्वनादिभिः ॥ १२१ ॥
यावदस्ति बलं स्थातुं मिलत्येतत्करद्वयम् ।
तावद्भुंजे त्यजाम्यन्यथेति संधा यतेर्यतः ॥ १२२ ॥
पुरा रत्नसुवर्णादिनानाभाजनभाजिनः ।
दीनता सज्यते तेभ्यो हीनभाजनभोजने ॥ १२३ ॥
तत्सद्म विश्वगेहाख्यं तद्गृहक्षालनादिना ।
यत्संगाऽसंयमौ च स्तस्तस्मात्पाणिपुटाशनम् ॥ १२४ ॥
कान्तातारुण्यलावण्यलीलालोकनजल्पन-।
स्मेरास्याब्जपदन्यासविलासाद्यनिरीक्षणः ॥ १२५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौर्यथाऽत्ति तृणव्रातं क्षितं भुंजीत यत्नतः ।
तथाऽऽन्नाद्यमनास्वाद्य गोचारज्ञो यथोचितम् ॥ १२६ ॥

भृंगः पुष्पासवं यद्वत् गृह्णात्येकगृहेऽशनम् ।
गृहिबाधां विना तद्वद्भुंजीत भ्रमराशनः ॥ १२७ ॥

यथालब्धेन भक्तेन कुर्यादुदरपूरणम् ।
यद्वन्मृदादिना लोकैः क्रियते श्वभ्रपूरणम् ॥ १२८ ॥

तोषरोषव्यपेतस्य ज्ञानध्यानप्रसिद्धये ।
इत्येषा यत्नतो भुक्तिरेषणासमितिर्मता ॥ १२९ ॥

विहायाऽऽदाननिक्षेपौ सहसाऽनवलोक्य च ।
दुःप्रमार्जनमप्रत्यवेक्षणं चार्द्रमानसः ॥ १३० ॥

विधायोपधितद्देशवीक्षणं प्रतिलेखनैः ।
लब्धस्वेदरजः सूक्ष्मलतातिमृदुभिः पुनः ॥ १३१ ॥

तौ प्रमृज्योपधेर्यत्नान्निक्षेपाऽऽदानयोः कृतिः ।
यतेरादाननिक्षेपसमितिः परिकीर्त्तिता ॥ १३२ ॥ त्रिकम् ।

कृष्टप्लुष्टादिदेशेऽगिच्छिद्रहीने घने च यः ।
व्युत्सर्गोऽङ्गमलादेः स्याद्व्युत्सर्गसमितिर्यतेः ॥ १३३ ॥

वीक्षितेऽस्मिन्दिने हस्तबाह्यस्पर्शपरीक्षिते ।
रात्रौ सत्यंगिनो नो वेत्यंगिहीने तमुत्सृजते ॥ १३४ ॥

सीग्याढ्यश्चेद्द्वितीयेऽत्र तृतीये वांगिसंगते ।
विवशो विमृजेदल्पप्रायश्चित्तो यतिस्ततः ॥ १३५ ॥

यद्वद्व्रततनुत्राणः शराऽऽसाराऽपराजितः ।
यतिः समितिगात्रत्रस्तद्वत्पापेषु दुर्जयः ॥ १३६ ॥

दोषेभ्यो गोपनं रक्षावतानां गुप्तिरिष्यते ।
सा मानसवचःकायदंडत्रितयदंडनी ॥ १३७ ॥

मनःपंचेन्द्रियेभेन्द्रस्वैरचारनिवारिणी ।
स्वगोचरे मनोगुप्तिर्ज्ञानध्यानरता मतिः ॥ १३८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गजाश्वशस्त्रशास्त्रादिव्याख्यायाः क्लेशकारिणः ।
सत्यस्याऽपि निवृत्तिर्वाग्गुप्तिर्वाचंयमोऽथ वा ॥ १३९ ॥
कायावद्यक्रियात्यागः कायगुप्तिर्मताऽथ वा ।
कायोत्सर्गः समुत्सर्गः संगस्य द्विविधस्य यः ॥ १४० ॥
पुरस्य परिखा रक्षा क्षेत्रस्य च वृतिर्यथा ।
तथा व्रतानामेतास्तु गुप्तयो गुप्तयः स्मृताः ॥ १४१ ॥
परिहारेण दोषाणां शुद्धिर्यस्मिन्स संयमः ।
परिहारविशुद्धिः स्याद्दृद्धिरीदृग्विधस्य सा ॥ १४२ ॥
भुक्त्वा प्रोज्झितभोगस्य त्रिंशद्वर्षस्य जन्मनः ।
प्रत्याख्यानाख्यपूर्वाम्बुराशिपारगयोगिनः ॥ १४३ ॥
समापृथक्त्वं तीर्थेशपादपार्श्वनिवासिनः ।
त्यक्त्वा सन्ध्यात्रयं नित्यं गव्यूतिद्वयगामिनः ॥ १४४ ॥ त्रिकम् ।
जीवराशौ चरंश्चैष पापालेपो यथांभसि ।
वसत्सरोजिनीपत्रं पयोलेपविवर्जितम् ॥ १४५ ॥
सूक्ष्मोऽल्पः सांपरायः कषायोऽस्मिन्निति संयमः ।
स्यात्सूक्ष्मसांपरायसामायिकद्वितयात्मकः ॥ १४६ ॥
यथा विरागं स्वं रूपं तथैवाऽऽख्यात इत्ययम् ।
यथाख्यातो मतोऽघौघघनसंघप्रभंजनः ॥ १४७ ॥
सं सम्यग्दर्शनज्ञानपावनः पापघातनः ।
यो द्वन्द्वद्वितयस्य स्याद्यमस्त्यागः स संयमः ॥ १४८ ॥
सम्यग्दृग्बोधमूलं व्रतसमितितिस्कन्धशाखानुबन्धं
शीलस्तोमप्रवालं गुणकुसुमगणं सत्सुखालीफलाढ्यम् ।
गुप्तिव्राताऽऽलवालाऽमृतपरिकलितं सत्त्वसंतापनोदं
सम्यक्चारित्रकल्पद्रुममहमतुलं संश्रितोऽस्मीष्टपुष्ट्यै ॥ १४९ ॥
मोहोद्दामतमोघटाविघटनः स्फारैर्विशेषोत्करैः
दुर्वारापरदुःकृतोत्पलकुलप्लोषी जगद्वन्दितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोन्मीलन्नवकेवलादिकमलः सन्मार्गसन्मंडनः
स्तान्मच्चित्तनभःस्थले स्थिरतमश्चारित्रचण्डद्युतिः ॥१५०॥

नमिर्वरश्रीः प्रणयैकभूमि-
र्जिनः स नः पातु दयानिधानः ।
अलं गलत्यर्जितकर्मजालं
यस्येक्षणान्मंक्षु महोदयस्य ॥ १५१ ॥

॥ इति श्रीवीरनन्दिसिद्धान्तिचक्रवर्तिप्रणीते श्रीआचारसारनाम्नि ग्रन्थे चारित्राचारवर्णनात्मकः पंचमोऽधिकारः ॥ ५ ॥

अथ षष्ठोऽधिकारः ।



वन्दे मुदा श्रीशजिनाभिनन्दनं
शश्वत्पदानम्रसुखाभिनन्दनम् ।
तपः स्फुरद्बाह्यनिमग्नमन्मथं
विनेयसन्दर्शितमुक्तिसत्पथम् ॥ १ ॥

तपः पोतेन येनाऽसौ संसारोरुसरित्पतिः ।
तीर्यते त्वरयेदानीं तत्तपः प्रतिपाद्यते ॥ २ ॥

तपः प्राहुरनुष्ठानं मानसाक्षनियामकम् ।
बाह्याभ्यन्तरभेदं तत्प्रत्येकं षड्विधं मतम् ॥ ३ ॥

अनशनावमौदर्ये वृत्तिसंख्यारसोज्झिती ।
विविक्तशयनासनं कायक्लेशो बहिस्तपः ॥ ४ ॥

अशनत्यागोऽनशनं साकांक्षाकांक्षभेदगम् ।
तदाद्यमेकद्वित्र्यादिषण्मासानशनान्तगम् ॥ ५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साकारसर्वतोभद्रसिंहनिःक्रीडितादयः ।
साकांक्षस्योपवासस्य भेदाश्चैकान्तरोदयः ॥ ६ ॥
निःकांक्षोऽसौ भवेद्भक्तप्रत्याख्यानेंगिनीमृतिः ।
प्रायोपगमनेष्वायुरन्तसंन्यासकर्मसु ॥ ७ ॥
देहदर्पविनाशाय संयमद्वयसिद्धये ।
कुर्यादनशनं लाभसत्काराद्यनपेक्षया ॥ ८ ॥
ग्रासहीननिजाहाराद्यूनाहाराशनव्रतम् ।
तपः स्यादवमौदर्यमक्षकक्षदवानलः ॥ ९ ॥
उपवासोतिमात्राशनोत्पन्नश्रमदोषहृत् ।
ध्यानस्वाध्यायनिद्रार्त्तिजयाद्यर्थमिदं मतम् ॥ १० ॥
वृत्तिर्वाटगृहाऽऽहारपात्रदातृषु वर्त्तनम् ।
संख्या तन्नियमो वृत्तिपरिसंख्या निजेच्छया ॥ ११ ॥
इयमाशानिरासायादीनताभावनाप्तये ।
गात्रयात्रानिमित्तान्नमात्रकांक्षस्य योगिनः ॥ १२ ॥
दधिक्षीराऽऽज्यतैलादेः परिहारो रसस्य यः ।
तपो रसपरित्यागो मधुरादिरसस्य वा ॥ १३ ॥
कायकान्तिमदाक्षेभक्षोभवारणकारणम् ।
परिहारो रसस्यायं स्याज्जितेन्द्रिययोगिनः ॥ १४ ॥
विविक्तेऽध्ययनध्यानबाधकोत्करवर्जिते ।
शयनं चाऽऽसनं यत्तद्विविक्तशयनासनम् ॥ १५ ॥
तरुकोटरशून्यागाराऽऽरामोर्वीधरादयः ।
विविक्ताः कामिनीषण्ढपशुक्षुद्रांगिवर्जिताः ॥ १६ ॥
सुखोपलालितः कायो नालं सद्ध्यानसिद्धये ।
तद्देहदमनं कायक्लेशः क्लेशैर्मतोचितैः ॥ १७ ॥
निर्दयं मर्दनीयोऽयं कायः क्लेशकरः पुरा ।
चिरं रिपुरितीवैषः कायक्लेशरतो यतिः ॥ १८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीरस्वस्तिकवज्राब्जहस्तिशुण्डासनादयः ।
व्युत्सर्गः शवगोदंडचापशय्यादयश्च ते ॥ १९ ॥
तपो बाह्यमिदं बाह्यलोकानन्दैकमन्दिरम् ।
आभ्यन्तरतपः क्षीरसागरेन्दुं नमाम्यहम् ॥ २० ॥
तत्प्रायश्चित्तं विनयो वैयावृत्त्यं जगन्नुतम् ।
स्वाध्यायो भवेद्व्युत्सर्गो ध्यानं चाभ्यन्तरं तपः ॥ २१ ॥
येनागो गलति प्रत्नं प्रायश्चितं तदुच्यते ।
कर्म प्रायोजनस्तस्य चित्तं चेतोहरं यतः ॥ २२ ॥
आलोचनप्रतिक्रमणोभयानि विवेचनम् ।
व्युत्सर्गस्तपश्छेदमूलपरिहारदर्शनम् ॥ २३ ॥
प्रायश्चित्तस्य भेदाः स्युर्दशैवं तत्र संश्रये ।
दोषाणां यत्प्रमोदाद्यैराद्यं तेषां निवेदनम् ॥ २४ ॥ युग्मम् ।
ज्ञातश्रुतरहस्याय प्रशान्तस्वान्तवृत्तये ।
अपरिस्राविणे शास्तैकान्तस्थायैव सूरये ॥ २५ ॥
विनयेनोपसृत्योपविश्य पार्श्वे कृतांजुलेः ।
बालवद्गर्हतोऽवक्रमित्येतत्स्याद्विशुद्धये ॥ २६ ॥ युग्मम् ।
आकंपिताऽनुमापितदृष्टबादरसूक्ष्मगम् ।
छन्नं शब्दाकुलं बह्वव्यक्ततत्सेवितान्यपि ॥ २७ ॥
दशेत्यालोचनाऽऽगांसि त्याज्यान्यात्महितैषिणा ।
सदा हि साधयन्त्यार्याः परलोकममायया ॥ २८ ॥ युग्मम् ।
ददात्यल्पं मम प्रायश्चित्तं भीत्येति सूरये ।
परोपकरणानां यद्दानमाकंपितं मतम् ॥ २९ ॥
ग्लानः क्लेशासहोऽस्म्यल्पं प्रायश्चित्तं ममार्प्यते ।
चेद्दोषाख्यां करिष्यामीत्यादिः स्यादनुमापितम् ॥ ३० ॥
परिरक्षितागः संकीर्त्तिः स्याद्दृष्टं बादरं स्मृतम् ।
स्थूलानामेव दोषाणामालस्याद्यैर्निवेदनम् ॥ ३१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मागःकीर्त्तनं सूक्ष्मदोषस्याऽपि विशोधकः ।
इति ख्यात्यादिहेतोः स्यात्सूक्ष्मं स्थूलोपगूहनम् ॥ ३२ ॥
दोषे सतीदृशे देयं किं प्रायश्चित्तमित्यलम् ।
प्रभुः स्वच्छादनेन स्याच्छन्नं लज्जाभयादिभिः ॥ ३३ ॥
व्रतिव्रातघनध्याने स्वदोषपरिकीर्त्तनम् ।
लज्जाद्यैः पाक्षिकादौ यत्तच्छब्दाकुलितं मतम् ॥ ३४ ॥
प्रायश्चित्तमिदं युक्तं न वेत्यल्पतदाशया ।
बहुसूरिपरिप्रश्नो यावदल्पं स बह्विति ॥ ३५ ॥
स्वसमानज्ञानतपोबालस्याऽऽलोचनं भवेत् ।
अव्यक्तं ह्रीभयप्रायश्चित्तभीत्यादिहेतुतः ॥ ३६ ॥
मादृशो वेत्यसावेव ममागोऽस्मै यदर्पितम् ।
तन्ममेति स्वदोषोक्तिरस्मै तत्सेवितं मतम् ॥ ३७ ॥
साऽऽमांगसंगतं यद्वन्नौषधं व्याधिबाधकम् ।
तथाऽनालोचनाशुद्धं नैनोनाशकरं तपः ॥ ३८ ॥
द्वयाश्रयं संयतानां स्यादार्यिकाणां त्रिगोचरम् ।
सप्रकाशप्रदेशे तु तच्चारित्रविभूषणम् ॥ ३९ ॥
आलोच्यार्पितप्रायश्चित्तवृत्तिविवर्जितः ।
सन्मंत्रनिश्चयेऽप्युद्योगोनवत्फलवर्जितः ॥ ४० ॥
मिथ्यामदाऽऽगोऽस्त्वित्याद्यैर्यद्दोषेभ्यो निवर्तनम् ।
प्रतिक्रमणमल्पापराधस्यैकाकिनो मुनेः ॥ ४१ ॥
स्यात्तदुभयमालोचनाप्रतिक्रमणद्वयम् ।
दुःस्वप्नदुष्टचिन्तादिमहादोषसमाश्रयम् ॥ ४२ ॥
परिहर्त्तुमशक्तस्य दोषं द्रव्यादिसंश्रयम् ।
तद्द्रव्यादिपरित्यागो विवेकः कथितोऽथ वा ॥ ४३ ॥
अप्रासुकस्य सेवायां त्यक्तस्य प्रासुकस्य च ।
प्रमादेन पुनः स्मृत्वा स तदा तद्विसर्जनम् ॥ ४४ ॥ युग्मम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्युत्सर्गोन्तमुहूर्त्तादिकालं कायविसर्जनम् ।
सद्ध्यानं तन्मलोत्सर्गनद्याद्युत्तरणादिषु ॥ ४५ ॥
तपः स्यादुपवासैकस्थानादिर्व्यसनादिभिः ।
व्रतातिचारे सत्येतत्प्रायश्चितं तु षड्विधम् ॥ ४६ ॥
दिवसादितपश्छेदश्छेदस्संयमपर्यये ।
सदर्पकृतदोषस्य चिरदीक्षहितैषिणः ॥ ४७ ॥
पुनर्दीक्षाग्रहो मूलं सर्वां पूर्वां तपःस्थितिम् ।
छित्त्वोन्मार्गस्थपार्श्वस्थप्रभृतिश्रमणेष्विदम् ॥ ४८ ॥
सच्चारित्रामृतापात्रं स्युः पार्श्वस्थः कुशीलकः ।
संसक्तोऽप्यवसन्नश्च मृगचारीति पंच ते ॥ ४९ ॥
वसत्युपधिसंगस्थः पार्श्वस्थः स्यात्कुशीलकः ।
संघाहितकरस्तीव्रकषायो व्रतवर्जितः ॥ ५० ॥
संसक्तो वैद्यमंत्रावनीशसेवादिजीवनः ।
ज्ञानचारित्रहीनोऽवसन्नः स्यात्करणालसः ॥ ५१ ॥
स्वच्छन्दो यो गणं त्यक्तुं चरत्येकाक्यसंवृतः ।
मृगचारीत्यमी जैनधर्माऽकीर्त्तिकरा नराः ॥ ५२ ॥
परिहारोऽनुपस्थापनपारंत्रिकभेदभाक् ।
निजान्यगणभेदं तत्राद्यं तत्राद्यमुत्तमम् ॥ ५३ ॥
द्वादशाब्देषु षण्मासषण्मासानशनं मतम् ।
जघन्यं पंच पंचोपवासं मध्यन्तु मध्यमम् ॥ ५४ ॥
द्वित्रिशद्दंडदूरालयस्थेन वसतेर्यतीन् ।
सर्वान् प्रणमताऽपेतप्रतिवन्दनसाधुना ॥ ५५ ॥
स्वदोषाख्यातये पिच्छं विभ्राणेन पराङ्मुखम् ।
सूरीतरैः सहोपात्तमौनेनैतद्विधीयते ॥ ५६ ॥
प्रमादेनाऽन्यपाखंडिगृहस्थयतिसंश्रितम् ।
वस्तु स्तेनयतः किंचिच्चेतनाचेतनात्मकम् ॥ ५७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतीन्प्रहरतोऽन्यस्त्रीहरणादींश्च कुर्वतः ।
दशनवपूर्वज्ञस्य व्याद्यसंहननस्य तत् ॥ ५८ ॥ युग्मम् ।
करोति यदि दर्पेण दोषान् पूर्वविभाषितान् ।
सोयमन्यगणानुपस्थापनेन विशुद्ध्यति ॥ ५९ ॥
प्रायश्चित्तं तदेवात्र किन्तु स्वगणसूरिणा ।
आलोच्य प्रेषितः सतसूरिपार्श्वमनुक्रमात् ॥ ६० ॥
आलोच्य तैस्तैरप्राप्तप्रायश्चित्तोऽन्त्यसूरिणा ।
तमाद्यं प्रापितस्तेन दत्तं चरति पूर्ववत् ॥ ६१ ॥ युग्मम् ।
स्वधर्मरहितक्षेत्रे प्रायश्चित्ते पुरोदिते ।
चारः पारंचिकं जैनधर्मात्यन्तरतेर्मतम् ॥ ६२ ॥
संघोर्वीशविरोधांतःपुरस्त्रीगमनादिषु ।
दोषेष्ववंद्यः पाप्येष पातकीति बहिः कृतः ॥ ६३ ॥
चतुर्विधेन संघेन देशाच्चिष्कासितोऽप्यदः ।
चरत्येवाऽऽर्यवैराग्यसत्त्वज्ञानबलो व्रती ॥ ६४ ॥ युग्मम् ।
दर्शनं यत्पुनस्तत्त्वश्रद्धानं तन्महाव्रतैः ।
सार्द्धं यतेः स्थितस्येत्वा मिथ्यात्वं तदुदीरितम् ॥ ६५ ॥
देशं कालं बलं ज्ञात्वा गणी वैद्यवदंगिनाम् ।
अल्पानल्पेषु दोषेषु कुर्यात्तद्विशोधनम् ॥ ६६ ॥
कृतागसैव कर्त्तव्यं प्रायश्चित्तं त्रिशुद्धितः ।
ग्लानस्यैव प्रयत्नेन युक्तमौषधसेवनम् ॥ ६७ ॥
दोषव्युदासनैः शल्यमर्यादा संयमस्थिति-।
स्वान्तप्रशान्तिसंपत्तिप्रमुखार्थमिदं मतम् ॥ ६८ ॥
विनयः स्याद्विनयनं कषायेन्द्रियमर्दनम् ।
स नीचैर्वृत्तिरथवा विनयार्हे यथोचितम् ॥ ६९ ॥
सद्दृग्ज्ञानतपश्चारित्रोपचारप्रपंचकः ।
तत्र दृग्विनयत्यागः शङ्कादीनाममी च ते ॥ ७० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शंकाऽऽकांक्षाजुगुप्साऽन्यदृग्प्रशंसनसंस्तवाः ।
नाम्ना ज्ञेयास्त्रयोन्त्यौ तु मनोवाग्विषये स्तुती ॥ ७१ ॥

द्रव्यादिशोधनं वस्तुप्रमाणावग्रहादिकम् ।
बहुमानः श्रुतज्ञेषु श्रुतज्ञाऽऽसादनोज्झनम् ॥ ७२ ॥

वयःशीलश्रुतोनाधिकाद्युपाध्यायकीर्त्तनम् ।
चाऽनिह्नवेन येनाऽर्थं ज्ञानावरणकारणम् ॥ ७३ ॥

स्वराक्षरपदग्रन्थार्थाहीनाध्ययनादिकम् ।
स्याज्ज्ञानविनयः सम्यग्ज्ञानस्वर्मोक्षकारणम् ॥ ७४ ॥ त्रिकम् ।

आवश्यकक्रियाशक्तिर्नानोत्तरगुणोन्नतिः ।
तपस्तद्वृत्प्रमोदश्च स्यात्तपोविनयो यतः ॥ ७५ ॥

भक्तिश्चारित्रवस्त्वन्यवृत्ताऽनिन्दनमुद्यमः ।
परीषहजयादौ च चारित्रविनयो मुनेः ॥ ७६ ॥

उपोषसृत्य यश्चारैः " उपचारो " यथोचितः ।
स प्रत्यक्षपरोक्षात्मा तत्राद्यः प्रतिपाद्यते ॥ ७७ ॥

अभ्युत्थानं नतिः सूरावागच्छति सति स्थिते ।
स्थानं नीचैर्निविष्टेऽपि शयनोच्चासनोज्झनम् ॥ ७८ ॥

गच्छत्यनुगमो वक्तर्यनुकूलं वचो मनः ।
प्रमोदीत्यादिकं चैवं पाठकादिचतुष्टये ॥ ७९ ॥ युग्मम् ।

आचार्यादिष्वसत्स्वेवं स्थविरस्य मुनेर्गणे ।
प्रतिरूपकालयोग्या क्रिया चान्येषु साधुषु ॥ ८० ॥

आर्यादेशयमाऽसंयतादिषूचितसत्क्रिया ।
कर्त्तव्या चेत्यदः प्रत्यक्षोपचारोपलक्षणम् ॥ ८१ ॥

ज्ञानविज्ञानसत्कीर्तिर्नेतिराज्ञाऽनुवर्त्तनम् ।
परोक्षे गणनाथानां परोक्षप्रश्रयः परः ॥ ८२ ॥

विना येन विहीनस्य भिक्षोः शिक्षाऽमृताश्रियः ।
संश्रयाय निदानं नो तथा चाभ्युदयश्रियः ॥ ८३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनाज्ञावर्त्तनं कीर्तिर्मैत्री मानापनोदनम् ।
गुणानुरागिता संघसम्मदाद्याश्च तद्गुणाः ॥ ८४ ॥

किमत्र बहुनोक्तेन पदं सर्वेष्टसंपदाम् ।
रत्नत्रयीविभूषायां येन मुक्तिनिबन्धनम् ॥ ८५ ॥

व्यापत्प्रतिक्रिया वैयावृत्त्यं स्यात्सूरिपाठके ।
तपस्विशैक्ष्यग्लानेषु गणे संघे कुले यतौ ॥ ८६ ॥

मनोज्ञे च तपस्व्येषु नानाऽन्नशानवर्त्तनः ।
शैक्षो ज्ञानादिसंशिक्षो ग्लानो नानागदार्दितः ॥ ८७ ॥

गणः स्थविरसन्तानश्चातुर्वर्ण्यकदम्बकम् ।
संघः स्याद्दीक्षकाऽऽचार्यशिष्याम्नायः कुलं मतम् ॥ ८८ ॥

चिरप्रव्रजितः साधुर्यतिः शेषो हि संयमी ।
दीक्षोन्मुखो मनोज्ञाख्योऽसंयतो वा सुदर्शनः ॥ ८९ ॥

विद्याजात्यादिविख्यातो मिथ्यादृग्वाऽस्य संग्रहः ।
जिनप्रवचनस्यायं लोके गौरवकारकः ॥ ९० ॥ [पंचकम्]

परीषहसमाश्लेषेऽमीषां यच्छेमुषीमुदः ।
संपादनं त्रिरत्नाद्यै वैयावृत्त्यं त्रिशुद्धितः ॥ ९१ ॥

आवासाशनपानाद्यैः प्रासुकैः क्लेशनाशिभिः ।
तदभावे स्वकायेन स्वोपकारानपेक्षया ॥ ९२ ॥

विण्मूत्रश्लेष्मसिंघाणकादेर्देहादपोहनात् ।
यत्नेनोत्क्षेपनिक्षेपपरिवर्त्तक्रियादिभिः ॥ ९३ ॥

अस्मिन्निर्विचिकित्सत्ववत्सलत्वसनाथता ।
यशोऽभ्युदयनिश्रेयःसुखाप्तिप्रमुखा गुणाः ॥ ९४ ॥

स्वस्मै योऽसौ हितोऽध्यायः स्वाध्यायो वाचनादिकः ।
तपो वर्यमतो नान्यत्तपःसु द्वादशस्वपि ॥ ९५ ॥

नोर्ध्वमन्तर्मुहूर्त्तात्सध्यद्दानमध्ययनं पुनः ।
सदैनोनिर्जराकारि किन्तु न स्यात्कृतात्मनाम् ॥ ९६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनः सदर्थे वाक् पाठे वर्णोऽक्ष्णी तच्छ्रुतौ श्रुती ।
प्रसक्ते निष्क्रियेऽक्षेऽन्ये तदैकाग्र्यमिहाप्यलम् ॥ ९७ ॥

अस्मात्तत्त्वपराभ्यासः प्रशमश्च विरागता ।
भवेत् प्रभावनैकान्तवादिमानप्रमर्दनम् ॥ ९८ ॥

शरीरान्तर्बहिःसंगसंगव्युत्सर्जनं मुनेः ।
व्युत्सर्गः स्यात्समीचीनध्यानसंसिद्धिकारणम् ॥ ९९ ॥

ध्यानं तपः परं चित्तैकार्थलीनप्रवर्त्तनम् ।
कीर्त्यतेऽन्तर्मुहूर्त्तावस्थानं स्वर्मोक्षसाधनम् ॥ १०० ॥

विशिष्टमिष्टं घटयत्युदारं दूरस्थितं वस्त्वतिदुर्लभं च ।
जैनं तपः किं बहुनोदितेन स्वर्गश्रियं चाक्षयमोक्षलक्ष्मीम् १०१

नमोऽस्तु तस्मै मुनिसुव्रताय साक्षात्कृतन्यक्षचराचरौघ यः ।
व्रतानि सत्त्वैकहितानि यस्य सन्ति क्रमप्रह्वजगन्नयस्य ॥१०२

॥ इति श्रीमद्वीरनन्दिसिद्धान्तिचक्रवर्त्तिप्रणीते श्रीआचारसार-नाम्नि ग्रन्थे तपआचारवर्णनात्मकः षष्ठोधिकारः ॥ ६ ॥

अथ सप्तमोऽधिकारः ॥ ७ ॥

सद्वृत्तिः सुमतिः पतिस्त्रिजगतां नेता विमुक्तेः सृते-
र्यस्यात्यद्भुतचित्तशक्तिहुतभुग्ज्वालाकलापैरलम् ।
तन्मार्गानुगमार्गबन्धनमहासंघातिनिर्बन्धिनः
प्लुष्टो दुष्टपरीषहोद्भटभटः सोऽयं जिनः पातु नः ॥ १ ॥

क्षुत्तृट्शीतमलोष्णदंशमशकैर्यारोगशय्यातृण-
स्पर्शक्लेशवधानलाभमरतिं निर्दैशनं स्त्रीकृतम् ।
प्रज्ञाऽज्ञानभवौ सनाग्न्यशयनान्सत्कारयाञ्चानिष-
द्योद्भूतांश्च परीषहान्विजयते यो वीर्यचर्यो यतिः ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षुत्तीक्ष्णानशनादिजाक्षनिकरं स्वज्ञेयवीक्षाक्षमं
स्वान्तं भ्रान्ततरं करोति बलवत्प्राणान्प्रयाणोन्मुखान् ।
याऽन्यादीनजनेऽफलाऽतिसफला त्यागात्तपः पुष्टये
तस्या धृत्यमृताशनेन शमनं कुर्वन्व्रती क्षुज्जयः ॥ ३ ॥

चंडश्रंडकरः स्थलस्थितपयः संचारिणः प्राणिनो
भ्रष्टप्लुष्टतनूंस्तनोति नितरां यस्मिंस्तपे तापने ।
तस्मिन् स्निग्धविरुद्धभोजनरुजाऽऽतापादिपुष्यत्तृषां
त्यक्ते निःस्पृहतामृतेन कृतधीर्मुष्णाति तृष्णाजयः ॥ ४ ॥

प्रोत्कंपा हिमभीमशीतपवनस्पर्शप्रभिन्नांगिनो
यस्मिन्यान्त्यतिशीतखेदमवशाः प्रालेयकाविह्निनः ।
तस्मिन्नस्मरतः पुरा प्रियतमाश्लेषादिजातं सुखं
योगागारनिरस्तशीतविकृतेर्निर्वाससस्तज्जयः ॥ ५ ॥

प्राणाघातविभीतितस्तनुरतित्यागाच्च भोगास्पृहः
स्नानोद्वर्त्तनलेपनादिविगमात्प्रस्वेदपांसूदितम् ।
लोकानिष्टमनिष्टमात्मवपुषः पामादिमूलं मलं
गोत्रत्राणमिवादधाति वृजिनं जेतुं मलक्लेशजित् ॥ ६ ॥

ग्रीष्मे शुष्यदशेषदेहिनिकरे मार्तंडचंडांशुभिः
संतप्तात्मतनुस्तृषानशनरुक्क्लेशादिजातोष्णजम् ।
शोषस्वेदविदाहखेदमवशेनातं पुराऽपि स्मरन्
तन्मुक्त्यै निजभावभावनरतिः स्यादुष्णजिष्णुर्व्रती ॥ ७ ॥

शून्यागारदरीगुहादिशुचिनि स्थाने विविक्ते स्थित-
स्तीक्ष्णैर्मत्कुणकीटदंशमशकाद्यैश्चंडतुंडैः कृतां ।
स्वांगार्तिं परदेहजार्त्तिमिव तां यो मन्यमानो मुनि-
र्निःसंगः स सुखी च दंशमशकक्लेशं क्षमी तं नुमः ॥ ८ ॥

शार्दूलैर्मिलितेच्छभल्लभुजगाऽऽभोगे भयैकास्पदे
गन्धान्धद्विरदोत्करे करिरिपुक्रीडैकनीडे वने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वैरं कण्टककर्करादिपरुषेऽप्यत्राणपादश्चर–
न्नेकः सिंह इवार्तिभीतिविजयी व्रज्यार्तिजित्संयमी ॥ ९ ॥

कंडू या गलगंडपांडुदवथुग्रन्थिज्वरश्लीपद–
श्लेष्मोदुंबरकुष्ठपवनश्वासादिरोगार्दितः ।
भिक्षुः क्षीणबलोऽपि भेषजसुहृन्मंत्रानपेक्षः क्षमी
दुःकर्मारिविनिर्मिताऽऽर्तिविजयी स्याद् व्याधिबाधाजयः ॥१०॥

झंझावातहतार्तकौशिकशिवाफेत्कारघोरस्वरां
शंपाक्रूररदां स्फुरद्रुचितडिज्जिह्वां क्षपाराक्षसीम् ।
यो तं द्राग्गमयत्यसौ शयनजातायासजिद्धीरधी-
र्ध्वान्तात्यन्तकरालभूधरदरीदेशे प्रसुप्तः क्षणम् ॥ ११ ॥

श्रान्तः सन् श्रुतभावनाऽनशनसद्ध्यानाऽध्वयानादिभिः
स्तोकं कालमतिश्रमापहतये शय्यानिषद्ये भजन् ।
शुद्धोर्वीतृणपत्रसंस्तरशिलापट्टेषु तत्पीड़नः
कंडूयादिसहो भवेदिह तृणस्पर्शक्षमी संयमी ॥ १२ ॥

रुष्टैः पूर्वभवापकारकलनात्तज्जन्मवैरात्खलै–
र्म्लेच्छैर्निःकरुणैरकारणगुणद्वेषैश्च पापात्मकैः ।
देहच्छेदनभेदनादिविधिना यो मार्यमाणोऽप्यलं
देहात्मात्मविभेदवेदनभवक्षान्तिर्वधार्तिक्षमी ॥ १३ ॥

हंहो ! देह ! सहायतां तव समुद्दिश्यैव पोष्यो मया
पूर्त्तौ मत्तपसो गृहावविमतो भ्रान्त्वाऽप्यनासेऽशने ।
दोषः कोऽपि न विद्यते मम पुनर्लाभादलाभक्षमा
तां पूर्त्ति प्रतनोत्यतः प्रियतमैषैवेत्यलाभक्षमा ॥ १४ ॥

दुर्वारेन्द्रियवृन्दरोगनिकरक्रूरादिबाधोत्करैः
प्रोद्भूतामरतिं व्रतोत्करपरित्राणे गुणोत्पोषणे ।
मंक्षु क्षीणतरां करोत्यरतिजिद्धीरः स वंद्यः सतां
यो दंडत्रयदंडनाहितमतिः सत्यप्रतिज्ञो व्रती ॥ १५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्ण्यन्ते बहवस्तपोऽतिशयजाः सप्तर्द्धिपूजादयः
प्राप्ताः पूर्वतपोधनैरिति वचोमात्रं तदद्यापि यत् ।
तत्त्वज्ञस्य ममाऽपि तेषु न हि कोऽपीत्यार्त्तसंगोज्झिता
चेतोवृत्तिरटत्परीषहजयः सम्यक्त्ववंशुद्धितः ॥ १६ ॥

जेता चित्तभवस्त्रियस्य जगतां यासामपांगेषुभि-
स्ताभिर्मर्त्तानितंबिनीभिरभितः संलोभ्यमानोऽपि यः ।
तत्फल्गुत्वमवेत्य नैति विकृतिं तं वर्य्यधैर्यैन्दिरं
वन्दे स्त्र्यार्त्तिजयं जयन्तमखिलानर्थं कृतार्थं यतिम् ॥ १७ ॥

प्रत्यक्षाऽक्रमविश्ववस्तुविषयज्ञानात्मनः स्वात्मनो
गर्वः सर्वमतश्रुतज्ञ इति यः प्राप्ते परोक्षे श्रुते ।
सर्वस्मिन्नपि नो तनोति हृदये लज्जां स किं तामिति
प्रज्ञोत्कर्षमदापनोदनपरः प्रज्ञार्तिजित्तत्त्ववित् ॥ १८ ॥

ज्ञानध्यानरता मतिर्मम तपस्तीव्रं न चोत्पद्यते
ज्ञानं पूर्णमयं जडः पशुरिति श्रोतुं वचोऽहं क्षमः ।
नेत्यज्ञानपरीषहं स सहते प्रत्यक्तवस्तुस्थिति-
र्यः कार्यं भवति स्वहेतुयुगले सत्येव नेत्यन्यथा ॥ १९ ॥

भूषावेषविकारशस्त्रनिचयत्यागात्प्रशस्ताकृते-
र्बालस्येव मनोजजातविकृतिश्चित्तस्य लज्जेति ताम् ।
हित्वा मातृसमानमेव सकलं कान्ताजनं पश्यतः
पूज्यो नाग्न्यपरीषहस्य विजयस्तत्त्वज्ञतापोदयः ॥ १० ॥

वर्णी कर्णहृदां विदारणकरान् क्रूराशयैः प्रेरिता—
नाक्रोशान् घनगर्जतर्जनखरान् शृण्वन्नशृण्वन्निव ।
शक्त्याऽत्युत्तमसंपदाऽपि सहितः शान्ताशयश्चिन्तयन्
यो बाल्यं खलसंकुलस्य शयनक्लेशक्षमीं तं स्तुवे ॥ २१ ॥

ख्यातोऽहं तपसा श्रुतेन च पुरस्कारं प्रशंसां नतिं
भक्त्या मे न करोति कोऽपि यतिषु ज्येष्ठोऽहमेवेति यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्लानिं मानकृतां न याति स मुनिः सत्कारजातार्तिजि-
द्दोषो मे न गुणा भवन्ति न गुणा दोषाः स्युरित्यन्यतः ॥२२॥

प्राज्यं राज्यमुदस्य शाश्वतपदप्राप्त्यै तपोवृंहणे
देहो हेतुरयं हि भुक्त्यनुगता चास्य स्थितिस्तत्कुतः ।
भिक्षायै भ्रमणं ह्रियः पदमिदं यस्मान्महार्थास्पदं
नीचैर्वृत्तिरनिन्दितेति विचरन् याञ्चाजयः स्यान्मुनिः॥ २३॥

सर्वाशाशसहान्धकारपुरुजाऽऽयामां त्रियामां यमी
योगैर्योगमयत्यवार्यमहिमाऽऽभोगैर्मुहूर्त्तं यथा ।
क्षेत्रे स्त्रीजनपश्ववद्यरहिते हृद्ये निषद्यास्थितः
सन्नत्युग्रनिशाचराप्रतिहतध्यानो निषद्याजयी ॥ २४ ॥

देशं कालं स्वकीयं बलमपि नृपतिः सम्यगालोच्य यद्व-
च्छत्रुव्रातस्य जेता भवति यतिरपि स्वीयकर्मोदयेन ।
जातस्यास्यार्त्तिजातोद्भटभटकटकस्योरुधैर्यस्तथा यः
सोऽयं स्याद्वर्यवीर्याचरणचणनुतो वीरलक्ष्मीनिवासः ॥ २५ ॥

चक्रं विक्रममानमर्दनमुरुज्यां प्राज्यराज्यं च यः
क्षुन्थुर्मन्थविरागतातिशयतस्त्यक्त्वात्मरूपाप्तये ।
तत्प्राप्तौ तु परं क्षमादिकमरं तद्धर्मचक्रं दध-
द्वंद्योऽभूद्भुवनत्रयस्य तदिदं चित्रं चरित्रं मुनेः ॥ २६ ॥

इति श्रीमद्वीरनन्दिसिद्धान्तिचक्रवर्त्तिप्रणीते श्रीआचारसारनाम्नि
शास्त्रे वीर्याचारवर्णनात्मकः सप्तमोऽधिकारः ॥ ७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाष्टमोऽधिकारः ॥ ८ ॥



पद्मप्रभं कोकनदोदरप्रभं पद्माविनोदायतनं सनातनम् ।
सर्वात्मनीनोरुदयं महोदयं जिनेश्वरं नौमि विशुद्धधीश्वरम् ॥ १ ॥

शुद्धयोऽष्टौ विधीयन्ते पंचाचारविशुद्धये ।
भूषा मनोहराऽऽकारस्याऽतिशोभाश्रिये न किम् ॥ २ ॥

स्युर्भाववाक्यकायेर्याभिक्षाविनयसंश्रयाः ।
शयनाऽऽसनव्युत्सर्गेगेति चेत्यष्टशुद्धयः ॥ ३ ॥

सदाऽप्येतप्रमादा या वाचनादिरता मतिः ।
शंकादिदळ्मलापेता मार्दवादिगुणान्विता ॥ ४ ॥

स्याद्भावशुद्धिराचारः सत्यामस्यां प्रवर्द्धते ।
यद्वदुप्तो विशुद्धोर्व्यां सम्यग्बीजव्रजस्तथा ॥ ५ ॥ (युग्मम्)

कन्या प्रदानयोग्येयं क्षेत्रादिलवनोचितम् ।
प्रोत्खाताः परिखाः कूपवाप्यः शास्या दुरीहिताः ॥ ६ ॥

गीतवादित्रनृत्यानि हृद्यानीयं वरांगना ।
भेटभमल्लयुद्धानि सुकृतानि वनं वरम् ॥ ७ ॥

रोग्यंधः पंगुरित्यादिव्यवहारा श्रिता प्रिया—।
संयतोचितवाक्त्यागाद्देशकालसभोचिता ॥ ८ ॥

मृदुमधुरगभीरा वाङ्मोक्षमार्गोपदेशना ।
वाक्यशुद्धिर्गुणांभोधिविधुदीधितिरीरिता ॥ ९ ॥ (चतुष्कम्)

विश्रंभोपादिका लोकस्याऽस्तसंस्कारसंहतिः ।
कायशुद्धिः क्षमा मूर्तिभूतेवाऽऽभाति निस्पृहा ॥ १० ॥

विरागतालतोद्भूतिभूमिर्भीतिविवर्जिता ।
जातरूपमनोहारिण्येषां भूषा तपःश्रियः ॥ ११ ॥ (युग्मम्)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भयविस्मयविभ्रान्तिलीलाविकृतिलंघन—।
प्रधावनाद्यपेतेर्यापथशुद्धिर्दयान्विता ॥ १२ ॥

समाहितप्रशान्ताङ्गा प्रलंबितकरा वरा ।
गतिश्चारित्रसंपत्तिहेतुर्नीतिरिव श्रियः ॥ १३ ॥

आरंभः प्राणिनः प्राणव्यपरोप उपद्रवः ।
उपद्रवणमंगच्छेदादिर्विद्रावणं मतम् ॥ १४ ॥

संतापकरणं तस्य परितापनमेतकैः ।
चतुर्भिरन्नं निष्पन्नमधः कर्मातिनिन्दितम् ॥ १५ ॥ (युग्मम्)

वाक्चित्तकायकारितकृतानुमतकर्मणा ।
नवभेदं तदेतेन कर्मणा परिवर्जिता ॥ १६ ॥

योद्गमोत्पादनैषणैर्दोषैः संयोजनेन च ।
प्रमाणांगारधूमाख्यैर्व्यपेता कारणान्विता ॥ १७ ॥

एषणासमितिप्रोक्तक्रमाशनसेवना ।
भिक्षाशुद्धिर्गुणव्रातरक्षादक्षा स्मृता नुता ॥ १८ ॥ (त्रिकम्)

उद्दिष्टाध्यवधिपूतिमिश्राणि स्थापितं बलिः ।
प्राभृतं च प्रादुःकृतं क्रीतप्रामुष्यसंज्ञकौ ॥ १९ ॥

परिवृताभिहतं दोष उद्भिन्ननामकः ।
मालिकाऽऽरोहणा छेद्या निसृष्टानीति चोद्गमाः॥२०॥(युग्मम्)

यत्स्वमुद्दिश्य निष्पन्नमन्नमुद्दिष्टमुच्यते ।
अथ वा यमिपाखंडिदुर्बलानखिलानपि ॥ २१ ॥

प्रगता यस्मादसवस्तत्स्यात्प्रासुकमित्यलम् ।
शुद्धमप्यन्नमात्मार्थं कृतं सेव्यं न संयतैः ॥ २२ ॥

मत्स्यार्थं वा कृते मत्स्या माद्यन्ति मदनोदके ।
नो दर्दुरास्तथा भिक्षुर्दोष्युद्दिष्टान्नसेवकः ॥ २३ ॥

तंदुलाब्ध्यधिकक्षेपः स्वार्थं पाके यतीन्प्रति ।
स्यादध्यवधिरोधो वा पाकान्तं तत्तपस्विनाम् ॥ २४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूति प्रासुकपात्रादि मिश्रमप्रासुकेन यत् ।
मिश्रसंगे हि पाखंडियतिभ्यो यद्वितीर्यते ॥ २५ ॥

स्वगृहेऽन्यगृहे वा यत् स्थापितं पाकभाजनात् ।
अन्यस्मिन् भाजनेऽन्नादि निक्षिप्य स्थापितं मतम् ॥ २६ ॥

यक्षादेर्वलिदानावशिष्टाहारो बलिर्मतः ।
संयतागमनार्थं वा करणं बलिकर्मणः ॥ २७ ॥

वेलादिवत्समासर्तुवर्षादिनियमेन यत् ।
यतिभ्यो दीयमानान्नं प्राभृतं परिकीर्तितम् ॥ २८ ॥

गेहप्रकाशकरणं यत्वाविष्कृतमीरितम् ।
संस्कारो भाजनादीनां वा स्थानान्तरधारणम् ॥ २९ ॥

विद्याद्रव्यादिभिः क्रीतं क्रीतं प्रामृष्यमिष्यते ।
स्तोकर्णं वृद्धचवृद्धिभ्यां यतिदानार्थमर्जितम् ॥ ३० ॥

व्रीहिकूरादिभिः शालिकूरादेः परिवर्त्तनम् ।
यद्दास्यामीति यतये परिवर्त्तः प्रकीर्तितः ॥ ३१ ॥

स्यादायातमभिहतं ग्रामवारगृहान्तरात् ।
योग्यमृजुसमासन्ना ऽऽनीतमाद्देहतो यदि ॥ ३२ ॥

विमुद्रादिकमुद्भिन्नं मालिकाऽऽरोहणं मतम् ।
मालिकादिसमारोहणेनातीतं घृतादिकम् ॥ ३३ ॥

नृपतस्करभीत्यादेर्दत्तमाच्छेद्यमुच्यते ।
अनिसृष्टमीशानीशाऽनभिमत्या यदर्प्यते ॥ ३४ ॥

धात्रीदूतनिषग्वृत्तिनिमित्तेच्छाविभाषणम् ।
पूर्वं पश्चात्स्तुतिः क्रोधचतुष्कं वश्यकर्म च ॥ ३५ ॥

स्वगुणस्तवनं विद्यामंत्रचूर्णोपजीवनम् ।
चेत्येते षोडशोत्पादनाख्या दोषा विभाषिताः ॥ ३६ ॥

बाललालनशिक्षादिर्धात्रीत्वं दूतता मता ।
दूरबन्धुजनानां वान्नयनानयनक्रिया ॥ ३७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गजाऽश्वजांगुलीबालवैद्याद्यैर्नीचवृत्तिभिः ।
भिषग्वृत्तिर्मता तादृगन्यैरप्यशनाऽर्जनम् ॥ ३८ ॥
स्वरान्तरिक्षभौमांगव्यंजनच्छिन्नलक्षण-
स्वप्नाद्यंगनिमित्तैर्यन्निमित्तमशनार्जनम् ॥ ३९ ॥
दीनाद्यन्नाद्यदानेन पुण्यं ननु भवेदिति ।
पृष्टेऽभ्युपगमान्नार्थं भवेदिच्छाविभाषणम् ॥ ४० ॥
दाता ख्यातस्त्वमित्याद्यैर्यद्देह्यानन्दनन्दनम् ।
पूर्वं पश्चाच्च भुक्तेस्तत्पूर्वं पश्चात्स्तवद्वयम् ॥ ४१ ॥
क्रोधाद्यन्नार्जनं क्रोधचतुष्कं वश्यकर्म यत् ।
वश्यकृन्मंत्रतंत्रादिदेशनेनाशनार्जनम् ॥ ४२ ॥
स्वतपः श्रुतजात्यादिवर्णनं स्वगणस्तवः ।
विद्यागः सिद्धविद्यादिप्रभावादिप्रदर्शनम् ॥ ४३ ॥
पाठसिद्धादिमंत्राणामङ्गशृंगारकारिणः ।
चूर्णादेर्देशने स्यातां मंत्रचूर्णोपजीवने ॥ ४४ ॥
दोषाः शंकितम्रक्षिते निक्षिप्तं पिहितोज्झिते ।
व्यपहारो दातृमिश्रापक्वलिप्ता दशैषणाः ॥ ४५ ॥
शंकितं शंकितं सेव्यमेतदन्नं न वेति यत् ।
सस्नेहहस्तपात्रादिदत्तं यन्म्रक्षितं मतम् ॥ ४६ ॥
सचित्रपद्मपत्रादौ क्षिप्तं निक्षिप्तसंज्ञितम् ।
सचित्तेनाब्जपत्रादिना वृतं पिहिताशनम् ॥ ४७ ॥
स्याद्दुज्झितं बहु त्यक्त्वा यच्चूताद्यल्पसेवनम् ।
पानादि दीयमानं वाऽनल्पेन गलनेन तत् ॥ ४८ ॥
यत्यर्थं संभ्रमाच्चेलपात्रादेरसमीक्ष्य यत् ।
समाकर्षणमान्नातं व्यपहार इति श्रुते ॥ ४९ ॥
नग्नः शौण्डः पिशाचोऽन्धः पतितो मृतकाऽनुगः ।
तीव्ररोगी व्रणी विंगी नीचोच्चस्थानसंस्थितः ॥ ५० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसन्नगर्भिणी वेश्या दास्यन्तरिताऽशुचिः ।
भक्षयन्ति किमप्येवमाद्या दोषास्तु दातृगाः ॥५१॥ (युग्मम्)

मिश्रं षड्जीवसम्मिश्रमपक्वं पावकादिभिः ।
द्रव्यैरत्यक्तपूर्वस्ववर्णगन्धरसं विदुः ॥ ५२ ॥

लिप्तमप्रासुकैस्तोयमृत्तिकातालकादिभिः।
लिप्तैर्दर्वीकराद्यैर्यदीयमानाशनादिकम् ॥ ५३ ॥

स्वादार्थमन्नपानानां यत्संयोजनकर्म तत् ।
प्रोक्तं संयोजनं नानारोगाऽसंयमकारणम् ॥ ५४ ॥

अन्नेनार्द्धं तृतीयांशं कुक्षेः पानेन पूरयेत् ।
वायोः सुखप्रचारार्थं चतुर्थमवशेषयेत् ॥ ५५ ॥

प्रमाणादतिरेकोऽस्मात्प्रमाणागो भवेद्यतः ।
ध्यानाध्ययनभंगार्ति।निद्राऽऽलस्यादयोंऽगिनः ॥ ५६ ॥

रागेणेष्टान्नपानाप्तौ सेवांगारो निगद्यते ।
धूमोऽनिष्टान्नपानाप्तौ यद् द्वेषेण निषेवनम् ॥ ५७ ॥

क्षुच्छान्त्यावश्यकप्राणरक्षाधर्मयमा मुनेः ।
वैयावृत्त्यं च षट् भुक्तेः कारणानीति यन्मतम् ॥ ५८ ॥

ततः शरीरसंवृद्धचै तत्तेजोबलवृद्धये ।
स्वादार्थमायुःसंवृद्धचै नैव भुंजीत संयतः ॥ ५९ ॥

महोपसर्गाऽऽतंकांगसंन्यासांगिदयातपो—
ब्रह्मचर्याणि भिक्षोर्षट् कारणान्यशनोज्झने॥ ६० ॥

एतद्दोषविहीनान्नभुक्तेरन्तरकारिणः ।
अन्तरायाः कियन्तोऽत्र वर्ण्यन्ते वर्णिनामिमे ॥ ६१ ॥

रसपूयाऽस्थिमांसासृक्चर्मामेध्यादिवीक्षणम् ।
काकाद्यमेध्यपातोंगे वमनं स्वस्य रोधनम् ॥ ६२ ॥

अश्रुपातश्च दुःखेन पिंडपातः स्वहस्ततः ।
काकादिर्पिडहरणं पतनं त्यक्तसेवनम् ॥ ६३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादान्तरालात्पंचाक्षगतिः पंचेन्द्रियात्ययः ।
स्वोदरकृमिविण्मूत्ररक्तपूयादिनिर्गमः ॥ ६४ ॥

निष्ठीवनं सदंष्ट्रांगिदशनं चोपवेशनम् ।
पाणिपात्रेऽत्र सांगास्थिनखरोमादिदर्शनम् ॥ ६५ ॥

प्रहारो ग्रामदाहो ऽशुभोग्रबीभत्सवाक्श्रुतिः ।
उपसर्गाः पतनं पात्रस्यायोग्यगृहाशनम् ॥ ६६ ॥

जानुदेशादधः स्पर्शश्चेत्येवं बहवो मताः ।
लोकसंयमवैराग्यजुगुप्साभवभीतिजाः॥६७॥ षड्भिः कुलकम्।

ज्ञात्वा योग्यमयोग्यं च द्रव्यं क्षेत्रत्रयाश्रयम् ।
चरत्येव प्रयत्नेन भिक्षाशुद्धिमतो यतिः ॥ ६८ ॥

कुलर्द्धिजातिरूपाज्ञातपोज्ञानबलोद्भवैः ।
मदैर्विहीना विनये शुद्धिः सद्गुणसन्नतिः ॥ ६९ ॥

कार्याऽर्हात्सिद्धोपाध्यायसूरिसाध्वादिकेष्वसौ ।
समीक्ष्य क्षेत्रकालाऽवस्थासभादिं यथागमम् ॥ ७० ॥

नाऽत्यासन्नो न दूरस्थो न पार्श्वस्थो न पृष्ठगः ।
नोच्चस्थो वा गुरुं पृच्छेत्पृच्छेदभिमुखो नतः ॥ ७१ ॥

स्थिते स्थित्वोपविष्टे सत्युपविश्य गुरौ स्फुटम् ।
श्रद्धामार्दवभक्त्या ऽऽर्जवादियुक्तः कृतांजुलिः ॥ ७२ ॥

वक्तर्यन्यकथास्तस्मिन्विक्षेपोत्पादकं वचः ।
तत्पार्श्वे स्वैरवाग्वृत्तिप्रवृत्तौ च त्यजेद्यतिः ॥ ७३ ॥

संस्तरोत्क्षेपनिक्षेपप्रमुखैः परिकर्मभिः ।
शर्म संपादयेत्सूरेः शर्मैषी विनयान्वितः ॥ ७४ ॥

श्रुत्वोक्तिः स्खलितं नैव हसेत्कस्याऽपि नो वदेत् ।
अप्रियं हर्षामर्षाभ्यां न कुर्यात्परपीडनम् ॥ ७५ ॥

इयं विनयशुद्धिर्नुर्भूषाऽशेषगुणश्रियः ।
कारणं सुखदं नान्यदिहाऽमुत्र च देहिनाम् ॥ ७६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनात्मोद्देशनिष्पन्ने निरारंभेऽन्यसम्मते ।
शून्यागारादिदेशे न न स्त्रीक्षुद्रनटादिके ॥ ७७ ॥
व्युत्सर्गादिश्रमोच्छित्त्यै शयनाऽऽसनयोः कृतिः ।
यतेरत्यल्पकालं सा शयनाऽऽसनशुद्धिधीः ॥७८॥ (युग्मम्)
चूर्णीकृत्य नखात्केशान्विश्लिष्यैकैकमुत्सृजेत् ।
अनुल्बणमलेपं च क्ष्वेलसिंहाणकादिकम् ॥ ७९ ॥
वीक्ष्य पूर्वापरोर्ध्वाधःपार्श्वभागान्पुरोदिते ।
स्थाने प्रस्रवणाच्चारं वातं निःशब्दमुत्सृजेत् ॥ ८० ॥
पश्चाच्छुचिं प्रकृत्येष्टकाविकृत्यादिभिः पुनः ।
स्यात् क्षालिताऽऽसनकरः सौवीरोष्णजलादिभिः ॥ ८१ ॥
जरारुजार्दितः कायं संन्यासेन त्यजेदिति ।
व्युत्सर्गशुद्धिः संशुद्धिं विधत्ते यमिनामियम् ॥ ८२ ॥
पुष्टिं विशिष्टामियमष्टशुद्धिर्विशुद्धभावैः परिभाविताहः ।
करोति पंचाचरणस्य यद्वत् सौरीमरीचिः सरसीजलक्ष्मीम् ८३
छत्रत्रय यस्यं जगत्त्रयस्य स्वामित्वसंकीर्त्तिपरं रराज ।
सन्मंगलं वः स जिनोऽस्तु देवः श्रीवासुपूज्यो भुवनत्रयेऽभ्यः ८४

इति श्रीमद्वीरनन्दिसिद्धान्तिचक्रवर्त्तिप्रणीते श्री ' आचारसार '
नाम्नि शास्त्रे शुद्ध्यष्टकवर्णनात्मकोऽष्टमोऽधिकारः ॥ ८ ॥

नवमोऽधिकारः ॥ ९ ॥

श्रीमांस्त्रिलोक्या कृतपादसेवो यः सर्वसत्त्वामृतदिव्यरावः ।
स्वादिष्टदः सोऽनुपमप्रभावः सुपार्श्वदेवो भवकक्षदावः ॥ १ ॥
आवश्यकाक्रियाऽवश्यं कार्यं कर्माऽवशस्य वा ।
मुनेः कर्मोदितं सेति कषायाक्षोऽवशोऽवशः ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा षड्विधोदितेत्येवं समतास्तववन्दनम् ।
सप्रतिक्रमणप्रत्याख्यानकायविसर्जनम् ॥ ३ ॥

स्यान्नामस्थापनाद्रव्यभावभेदाच्चतुर्विधा ।
समता नाम समतैतस्या नाम स्ववाचकम् ॥ ४ ॥

जीवाजीवोभयेष्टार्थजातिद्रव्यगुणक्रिया ।
नामोत्पत्तिनिमित्तानपेक्षं यन्नाम तन्मतम् ॥ ५ ॥

यत्सेयमित्यभेदेन सद्दशेतरवस्तुषु ।
स्थापनं स्थापनं वाऽर्हत्प्रतिकृत्यक्षतादिषु ॥ ६ ॥

द्रव्यं भविष्यत्पर्यायं गतार्पितविवर्तं च ।
तद्द्वेधाऽऽगमो नोआगमश्चेत्याद्यस्तयोरयम् ॥ ७ ॥

जीवः स्यादुपयोगो नो विज्ञातसमतागमः ।
आगमादन्यो नोआगमाख्यः स त्रिविधो यथा ॥ ८ ॥

ज्ञायकांगं भविष्यंस्तद्व्यतिरिक्तमिति त्रिधा ।
तेष्वाद्यं भाव्यतिक्रान्तवर्त्तमानविकल्पतः ॥ ९ ॥

आधाराऽऽधेयधर्मोपचारेणांगत्रयस्य च ।
तत्त्वं धनुःशतं भुंक्ते धावतीत्यत्र वा तथा ॥ १० ॥

स्याच्च्युतं च्यावितं त्यक्तमित्यतीतं त्रिभेदगम् ।
च्युतं त्यागं विनाऽऽयुष्यकमक्षयगतात्मकम् ॥ ११ ॥

च्यावितं कदलीघातपतितं त्यागवर्जितम् ।
त्यक्तं भक्तादिकत्यागैर्घाताऽघातगतात्मकम् ॥ १२ ॥

विषास्त्रघातभीरक्तक्षयसंक्लेशवेदना- ।
ऽऽहारोच्छ्वासनिरोधाः स्युरायुष्यच्छेदकारिणः ॥ १३ ॥

स्याद्भाव्यर्पितपर्यायो भविष्यद्राजनामभाक् ।
भविष्यद्राजपर्यायो वोपचारान्नृपात्मजः ॥ १४ ॥

कर्मनोकर्मभेदं स्याच्चृतीयं तत्र कर्म यत् ।
चरित्रमोहमन्दानुभावद्रव्यैनसस्ततिः ॥ १५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोकर्ममृत्सुवर्णाश्ममाणिक्याऽहिस्रगादिकम् ।
समताकारणं बाह्यभावभावावलोकिनः ॥ १६ ॥
अर्पितेन विवर्तेन वर्त्तमानेन संयुतम् ।
द्रव्यं भावो भवेद्भावमात्रं वा विनयाश्रयः ॥ १७ ॥
भाव आगमनोआगमद्विभेदस्तयोर्भवेत् ।
आगमः समताशास्त्रार्थोपयोगयुतो यतिः ॥ १८ ॥
द्विभेद उपयुक्तस्तत्परिणत इतीतरः ।
शास्त्रं विनोपयुक्तोऽस्यामुपयुक्त इति स्मृतः ॥ १९ ॥
सं यः स्वार्थनिवृत्त्यात्मनेन्द्रियाणामयोऽयनम् ।
समयः सामायिकं नाम स एव समताह्वयम् ॥ २० ॥
समस्यारागरोषस्य सर्ववस्तुष्वयोऽयनम् ।
समायः स्यात्स एवोक्तं सामायिकमिति श्रुते ॥ २१ ॥
समतोपेतचित्तो यः स तत्परिणताह्वयः ।
प्रकृतोऽत्रायमन्यासु क्रियास्वेवं निरूपयेत् ॥ २२ ॥
सर्वव्यासंगनिर्मुक्तः संशुद्धकरणत्रयः ।
धौतहस्तपदद्वन्द्वः परमानन्दमन्दिरम् ॥ ॥२३ ॥
चैत्यचैत्यालयादीनां स्तवनादौ कृतोद्यमः ।
भवेदनन्तसंसारसन्तानोच्छित्तये यतिः ॥ २४ ॥ (युग्मम्)
यथा निश्चेतनाश्चिन्तामणिकल्पमहीरुहाः ।
कृतपुण्यानुसारेण तदभीष्टफलप्रदाः ॥ २५ ॥
तथाऽर्हदादयश्चास्तरागद्वेषप्रवृत्तयः ।
भक्तभक्त्यनुसारेण स्वर्गमोक्षफलप्रदाः ॥ २६ ॥ (युग्मम्)
गरापहारिणी मुद्रा गरुडस्य यथा तथा ।
जिनस्याऽप्येनसो हंत्री दुरितारातिपातिनः ॥ २७ ॥
सुमनः संगमादंगतीहस्तत्रं ? पवित्रताम् ।
पिष्टः प्रकृष्टमाधुर्यं प्रकृष्टेक्षुरसाद्यथा ॥ २८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चंपापावादिनिर्वाणक्षेत्रादीनि पवित्रताम् ।
वंद्यतां च व्रजत्येव वंद्यसंगमतस्तथा ॥ २९ ॥ (युग्मम्)
मत्वेति जिनगेहादिं त्रिःपरीत्य कृतांजुलिः ।
प्रकुर्वंस्तच्चतुर्दिक्षु सद्यावर्त्तां शिरोनतिम् ॥ ३० ॥
घोरसंसारगंभीरवारिराशौ निमज्जताम् ।
दत्तहस्तावलंबस्य जिनस्यार्चार्थमाविशेत् ॥ ३१ ॥ (युग्मम्)
जिनेशतारकाधीशपादसंपादितोत्सवः ।
श्रीलीलामन्दिरस्वीयलोचनेन्दीवरः पुनः ॥ ३२ ॥
ईर्याऽऽगः शुद्धयै व्युत्सर्गं कृत्वाऽऽसीनोऽनुकंपया ।
आलोच्य समतां वर्यां कुर्यादात्मेच्छयाऽन्यदा ॥३३॥ (युग्मम्)
लक्षणं समतादीनां पुरोक्तं किन्तु वर्ण्यते ।
व्युत्सर्गावसरोच्छ्वाससंख्यानामादि साम्प्रतम् ॥ ३४ ॥
क्रियायामस्यां व्युत्सर्गं भक्तेरस्याः करोम्यहम् ।
विज्ञाप्येति समुत्थाय गुरुस्तवनपूर्वकम् ॥ ३५ ॥
कृत्वा करसरोजातमुकुलालंकृतं निजम् ।
भाललीलासरः कुर्यात् द्यावर्त्तां शिरसो नतिम् ॥ ३६ ॥
आद्यस्य दंडकस्यादौ मंगलादेरयं क्रमः ।
तदन्तेऽप्यंगव्युत्सर्गः कार्यीतस्तदनन्तरम् ॥ ३७ ॥
कुर्यात्तथैव ' थोस्सामी ' त्याद्यार्यायांतयोरपि ।
इत्यस्मिन् द्वादशावर्त्ताः शिरोनतिचतुष्टयम् ॥ ३८ ॥ (युग्मम्)
ग्रन्थारंभे समाप्तौ च स्वाध्याये स्तवनादिषु ।
सप्तविंशतिरुच्छ्वासा व्युत्सर्गे दुर्मनस्यपि ॥ ३९ ॥
व्रतेत्यन्यतमस्याऽतिचारशुद्धेर्दिनस्य च ।
स्यात्प्रतिक्रमणेऽष्टाग्रशतं राज्यास्तु तद्दलम् ॥ ४० ॥
पाक्षिके त्रिशतं चातुर्मासिके स्याच्चतुः शतम् ।
शतानि पंच संवत्सरस्य षट्सु क्रियान्तगे ॥ ४१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचविंशतिरुच्छ्वासा गोचरेर्यातिचारयोः ।
जिनसाधुनिषद्यानां विण्मूत्रोत्सर्जनेनसि ॥ ४२ ॥

देवतास्तवने भक्ती चैत्यपंचगुरूभयोः ।
चतुर्दश्यां तयोर्मध्ये श्रुतभक्तिर्विधीयते ॥ ४३ ॥

स्यात्सिद्धश्रुतचारित्रशान्तिभक्तिचतुष्टयम् ।
अष्टम्यां श्रुतभक्त्योनमेतत्तीर्थेशजन्मनि ॥ ४४ ॥

पाक्षिके जिनचैत्ये च यद्यष्टम्यादिकर्मणाम् ।
संयोगो देवतापूजादर्शनस्तवनैः सह ॥ ४५ ॥

प्राक् शान्तिभक्तितस्तेषु चैत्यपंचगुरूभयोः ।
भक्ती स्तः सिद्धभक्तिः स्यात्सिद्धप्रतिकृतिस्तुतौ ॥४६॥ त्रिकं ।

चतुर्दशीदिने कर्तुं क्रियां न लभते यदि ।
धर्मकार्यादिनाऽष्टम्याः क्रिया कार्या तु पाक्षिके ॥ ४७ ॥

नन्दीश्वरक्रियायां स्तः सिद्धनन्दीश्वरोभयोः ।
भक्ती पंचगुरूणां च शान्तिभक्तिस्तदन्तगा ॥ ४८ ॥

स्यात्सिद्धचैत्ययोः पंचगुरूणां स्नपनस्तवे ।
भक्ती सशान्तिभक्तिस्तु हीनमध्याद्विभक्त्यदः ॥ ४९ ॥

स्थिरेतरप्रतिष्ठायां चतुर्थस्नपने पुनः ।
चलचैत्यप्रतिष्ठायाः पूर्वोक्तस्नपनक्रिया ॥ ५० ॥ द्विकम् ।

स्थिरप्रतिष्ठास्नानेऽस्मिन्नेषैवाऽऽलोचनाऽन्विता ।
चारित्रभक्तिः स्यात्किन्तु सिद्धभक्तेरनन्तरम् ॥ ५१ ॥

सिद्धभक्तिर्मुनौ ज्येष्ठे सिद्धान्तविदि सा युता ।
श्रुतभक्त्याऽऽचार्यभक्त्या तु गणिन्येतत्त्रयं पुनः ॥ ५२ ॥

सूरौ सैद्धान्तिकेऽल्पेऽपि प्रतिमायोगसंस्थिते ।
सिद्धभक्तिर्भवेद्योगशान्तिभक्ती च संयते ॥ ५३ ॥

अत्र चरित्रभक्तिश्चेत्सिद्धभक्तेरनन्तरम् ।
योगभक्त्या परीतिश्च परिनिष्क्रमणक्रिया ॥ ५४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानोत्पत्तौ क्रियैषैव सिद्धभक्तेरनन्तरम् ।
श्रुतभक्तिश्च स्यात्किन्तु जिननिर्वाणभूष्वपि ॥ ५५ ॥
परिनिर्वाणभक्तिस्तु योगभक्तेरनन्तरम् ।
परिनिर्वाणभक्त्या तु त्रिः परीत्य क्रिया भवेत् ॥५६॥ (युग्मम्)
सिद्धनिर्वाणयोः पंच गुरूणां भक्तिरप्यतः ।
स्याच्छान्तिभक्तिः श्रीवर्द्धमाननिर्वाणवासरे ॥ ५७ ॥
समाधिविधिना सम्यक् सामान्ये संयते मृते
सिद्धभक्तिर्भवेद्योगशान्तिभक्तिद्वयं ततः ॥ ५८ ।
यद्यत्र श्रुतभक्तिः स्यात्सिद्धभक्तेरनन्तरम् ।
कृतिकर्मेति निर्दिष्टं साधौ सिद्धान्तवेदिनि ॥ ५९ ॥
सामान्यमुनिकर्मैव व्रतिन्युत्तरयोगिनि ।
स्यात्तु चरित्रभक्तिश्च सिद्धभक्तेरनन्तरम् ॥ ६० ॥
स्यात्सिद्धश्रुतचारित्रयोगभक्तिचतुष्टयम् ।
शान्तिभक्तिश्च सिद्धान्तवेदिन्युत्तरयोगिनि ॥ ६१ ॥
आचार्येषु चतुर्थेषु योगभक्तेरनन्तरम् ।
सूरिभक्तिर्भवेदष्टौ निषद्यादेहयोरिमाः ॥ ६२ ॥
सिद्धश्रुतयोर्भक्ती श्रुतपंचम्यां तु वाचना ।
स्वाध्यायः शान्तिभक्त्यन्तमस्य निष्ठापनं ततः ॥ ६३ ॥
एतत्संन्यासप्रारंभे शान्तिभक्तिर्न हीह तु ।
श्रुतपंचमीक्रिया स्यादस्य निष्ठापने पुनः ॥ ६४ ॥
महत्यो भक्तयः स्वाध्यायेषु संन्यासगे मुनौ
योगभक्तिर्विधातव्या योगग्रहणमोक्षयोः ॥ ६५
सिद्धप्रतिक्रमणनिष्ठितकरणभक्तयः ।
चतुर्विंशतितीर्थेशभक्तिश्च नियमे यतेः ॥ ६६ ।
पाक्षिकचातुर्मासिकसांवत्सरिककर्मसु ।
प्रतिक्रमणसंज्ञेषु नियमोक्तक्रियैव तु ॥ ६७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्चाच्चारित्रभक्तिः स्यात्सिद्धभक्तेः क्रियान्तगाः ।
चारित्रबृहदालोचनाध्वाचार्यत्रिभक्तयः ॥ ६८ ॥ (युग्मम्)

चारित्रबृहदालोचगुरुभक्तिद्वयं विना ।
शेषाः शेषेषु कर्त्तव्याः स्युः प्रतिक्रमणेषु ताः ॥ ६९ ॥

प्राक् सिद्धयोगभक्ती स्तो दीक्षाग्रहणलुंचने ।
तल्लुंचनावसाने तु सिद्धभक्तिर्विधीयते ॥ ७० ॥

स्तः सिद्धयोगभक्ती द्वे प्रत्याख्याने तदन्तगा ।
सूरिभक्तिर्भवेत्सिद्धभक्तिर्निष्ठापनेऽस्य तु ॥ ७१ ॥

ताः स्युर्मंगलगोचरप्रत्याख्याने तु भक्तयः ।
महत्यः शान्तिभक्तिश्च सूरिभक्तेरनन्तरम् ॥ ७२ ॥

श्रुतसूरिभक्तिपूर्वं स्वाध्यायं प्रविधाय तु ।
निष्ठापयेदमुं काले श्रुतभक्त्या यथोदिते ॥ ७३ ॥

भवेन्मंगलगोचारमध्याह्ने स्नपनस्तवः ।
सवर्षाकालयोगस्याऽऽदाननिष्ठापनेऽपि तु ॥ ७४ ॥

योगभक्तिर्भवेदत्र सिद्धभक्तेरनन्तरम् ।
सिद्धान्तवाचनायाः श्रुतपंचम्याः क्रियोदिताः ॥ ७५ ॥ (युग्मम्)

सिद्धान्तार्थाधिकाराणामादावन्ते च भक्तयः ।
तिस्रः सिद्धश्रुताऽऽचार्यसंश्रिताः परिकीर्त्तिताः ॥ ७६ ॥

कुर्याद् व्युत्सर्गमेकैकं समाप्तौ भक्तिपूर्वकम् ।
सिद्धान्तार्थाधिकाराणां विद्याविद्याफलाप्तये ॥ ७७ ॥

ज्ञानविज्ञानसंपन्नः स्थविरः प्रश्रयाश्रयः ।
गुरूणां सन्निधौ सिद्धसूरिभक्ती विधाय तु ॥ ७८ ॥

गुर्वाज्ञया समादाय गणेशपदवीं ततः ।
शान्तिभक्तिं यतिः कुर्याद्वर्वादीनामपि स्तवम् ॥ ७९ ॥ युग्मम् ।

ऋज्वंगस्थाने व्युत्सर्गे लीलाऽऽलंबितदोर्युगे ।
समांगुलीचतुष्कान्तरस्थपादेऽप्यकंपिते ॥ ८० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुड्याश्रितं लतावक्रं स्तंभावष्टंभकुंचिते ।
स्तनेक्षाकाकदृक्शीर्षकंपितं युगकन्धरम् ॥ ८१ ॥
भ्रूक्षेपोत्तरितोन्मत्तपिशाचाष्टदिशेक्षणम् ।
ग्रीवाऽवनमनं मूकसंज्ञा चांगुलिचालनम् ॥ ८२ ॥
निष्ठीवनं खलिनितं शबरीगुह्यगूहनम् ।
कपित्थमुष्टिग्रीवोन्नमनं शृंखलिताह्वयम् ॥ ८३ ॥
मालिकोद्वहनं स्वांगस्पर्शनं घोटकांघ्रि च ।
स्थानं द्वात्रिंशदित्येते त्याज्या दोषास्तथा परे ॥ ८४ ॥ पंचकम् ।
वामान्तर्गुल्फवामस्य गुल्फो बाह्यः स्थितस्तयोः ।
पादयोरूरुमूलस्थं पल्यंके पार्ष्णियुग्मकम् ॥ ८५ ॥
गुल्फस्थोत्तानवामस्थोत्तानावामकरः समः ।
पल्यंकेऽत्रासने स्याच्चेत्कायोत्सर्गः सुसौष्ठवः ॥ ८६ ॥ युग्मम् ।
त्रिशुद्धौ द्वादशावर्त्ते द्विनिषण्णे चतुर्नतौ ।
बद्धांजुलौ त्यजेद्दोषान् कृतिकर्मव्रजेऽप्यमून् ॥ ८७ ॥
स्तब्धः प्रविष्टोऽनालब्धमालब्धं परिपीडितम् ।
दोलायितं मनोदुष्टं मत्स्योद्वर्त्तनभेषितम् ॥ ८८ ॥
हीनाधिकर्द्धिगौरवशेषगौरवधर्घरम् ।
भेष्यत्वं स्तनितं मूकमुन्मत्तकमनाद्रुतम् ॥ ८९ ॥
तर्जितं शब्दितं संघकरमोचितं कुंचितम् ।
वेदिकाबद्धकोधादिशल्याचार्यादिदर्शनम् ॥ ९० ॥
प्रत्यनीकं सुललिताद्दृष्टे कच्छपरिंगितम् ।
हलितं त्रिवलितं चेति द्वात्रिंशदमी मताः ॥ ९१ ॥ चतुष्कम् ।
नष्टदुष्टाष्टकर्माणस्ते पुष्टाष्टगुणर्द्धयः ।
त्रिलोकीमस्तकोत्तंसाः सिद्धा नः सन्तु सिद्धिदाः ॥ ९२ ॥
श्रीपादेंदूदयस्यास्तीदमरीचिकुरोऽम्बरम् ।
यस्य स्याद्वादिनो विश्ववेदिनः पातु नो जिनः ॥ ९३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपक्षक्षयजानंतानंतज्ञानादिसद्गुणः ।
दद्यादद्य स नः प्राज्यं वृजिनारिजयं जिनः ॥ ९४ ॥

निराकृत्यान्तरं ध्वान्तं सूरिसूरः करोत्वरम् ।
सन्मानसांबुजानंदममन्दं वाक्करैर्वरैः ॥ ९५ ॥

कुर्वन्नखर्वदुर्वादिमदद्विरदमर्दनम् ।
स्याद्वादाद्रावुपाध्यायसिन्धुरारिर्विजृंभताम् ॥ ९६ ॥

रत्नत्रयामृतांभोधिविधवः साधवः श्रियम् ।
दद्युरात्मर्द्धिनिर्धूतदुरितध्वान्तवृत्तयः ॥ ९७ ॥

त्रिजगद्गुरवः सर्वैर्गुणैर्गुरव इत्यमी ।
गुरवः पंच नः पान्तु पापापायनिकायतः ॥ ९८ ॥

लोकत्रयेशदत्तार्घ्यमप्यनर्घ्यं महोदयम् ।
रत्नत्रयं पवित्रं नः पुनातु हृदयं सदा ॥ ९९ ॥

स्तुत्यः स्तुतिशतैर्धर्मः शर्मदो यो गुणाधिकः ।
गुणिनः सद्गुणाश्चैते भवन्तु मम मङ्गलम् ॥ १०० ॥

यत्कान्तकान्तिः कुमुदं वितन्वती
तनोत्यलं तत्कमलोत्सवं नवः ।
निरस्तदोषाऽभ्युदयाक्षयश्रियं
क्रियात्स चंद्रप्रभदेववल्लभः ॥ १०१ ॥

इति श्रीमद्वीरनन्दिसिद्धान्तिचक्रवर्तिप्रणीते श्रीआचारसारनाम्नि शास्त्रे नवमोऽधिकारः ॥ ९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ दशमोऽधिकारः ॥ १० ॥

यद्वाक्यामृतमाजवंजवदवोत्तप्तात्मनामात्मनां
नानैनश्चिततापलोपनपरं श्रीशीतलः शीतलम् ।
यस्यांगस्य मरीचिमंडलमिलानेंदिरामन्दिरं
पायात्पार्वणशीतरश्मिरुचिरः सोऽयं जिनाधीश्वरः ॥ १ ॥

दीक्षां पीठिकयेदितेन विधिना शिक्षां गृहीत्वा समा—
चारेणानुमतो गणेन गणिना प्राप्तश्च सत्सूरिताम् ।
षट्त्रिंशद्गुणभूषणो व्यपगतव्यापद्गणं सद्गणं
रक्षन् यः समयं नयत्यतितरां धन्यः स मान्यो मुनिः ॥ २ ॥

ज्योतिः शास्त्रविनूतजातकमताज्ञानानिमित्तक्षणा—
प्रश्नाद्यायचयग्रहाबलिबलक्षीणत्वसंप्रेक्षणात् ।
त्यक्त्वास्याक्षरलक्षणेक्षणवशात्कालागमात्स्वायुषो
मानं द्वादशवर्षसंमितमतो हीनं च निश्चित्य सः ॥ ३ ॥

पश्चाच्चारुतरात्मसंस्करणधीर्धीरो मुमुक्षुर्गुणी
प्रीत्या पालितमात्मनात्मनि महान्स्नेहानुबंधे महत् ।
वृन्दं तुन्दिलबालरोगिसुतपः शैक्षादिभिक्ष्वन्वितं
प्रारोप्यात्मभरं वरं गणधरे सद्वृत्तलक्ष्मीधरे ॥ ४ ॥

रक्षादक्षतमं गणस्य गणिनं सर्वं गणं चादरा
दाहूय प्रियवाक्चयामृतरसासारेण चेतोगतम् ।
तापं तस्य निरस्य दुस्तरतरं जातं वियोगाद्गुरोः
स्वस्यातो नियतं विहारमपरं कुर्वन्मुनीन्द्रोत्तमः ॥५॥त्रिकम् ।

प्रेक्ष्यन्ते बहुदेशसंश्रयवशात्संवेगिताद्याशय—
स्तीर्थाधीश्वरकेवलोद्गममही निर्वाणभूम्यादयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थैर्यं धैर्यविरागतादिषु गुणेष्वाचार्यवर्यं क्षणा—
द्विद्यावित्तसमागमादधिगमो नूत्नार्थसार्थस्य च ॥ ६ ॥
सद्रूपं बहुसूरिभाक्तिकयुतं क्षामादिदोषोज्झितं
क्षेत्रं पात्रमपीक्ष्यते तनुपरित्यागस्य निःसंगता ।
सर्वस्मिन्नपि चेतनेतरबहिःसंगे स्वशिष्यादिके
गर्वस्यापचयः परीषहजयः सल्लेखना चोत्तमा ॥ ७ ॥
सम्यक्कायकषायकार्श्यकरणं सल्लेखनाद्या वरै—
र्योगैर्वर्षचतुष्टयं रसपरित्यागैस्तथाब्दद्वयम् ।
सौवीरान्नरसोज्झनैरभिषवाच्चेनाब्दमेतद्दलं
बाह्यैर्मन्दतपोभिरुग्रनियमैरब्दार्धमंगार्दनम् ॥ ८ ॥
कालं कायबलं च देशमशनं पानं प्रकृत्यादिकं
ज्ञात्वा पित्तकफानिलैर्निजगतैर्न स्याद्यथा विक्रिया ।
कर्त्तव्या विदुषा तथोक्तविधिभिर्बाह्यैस्तपः प्रक्रमै—
राचार्योऽनुमतैः समाधिफलदैरेषांगसल्लेखना ॥ ९ ॥
सद्ध्यानप्रकरैः कषायविषया सल्लेखना श्रेयसी
स्वेष्टानिष्टवियोगयोगयुगजे बाधानिदानोद्भवे ।
इत्यार्त्तस्य चतुर्विधस्य विजयो हिंसामृषास्तेयसं—
रक्षानन्दविभेदतोऽशुभकृतो ध्यानस्य रौद्रस्य च ॥ १० ॥
ध्यातृध्यानविचित्यचिंतनफलान्यंगानि चत्वारि तैः
स्याद् ध्यानं सदसच्च तत्र भवति ध्यातोत्तमैरन्वितः ।
आद्यैः संहननैस्त्रिभिस्त्रिभिरुपेतोऽन्त्यैः स नाऽस्मिन्पुनः
चिन्तातर्वहिरंगकारणसृणिप्रेर्यो हि कार्यद्विपः ॥ ११ ॥
एकस्मिन्विषयेऽग्रमाननमभूदस्या मतेरित्यसा—
वेकाग्र्या विषयोपयोगनिरता चिन्ता निरोधोऽचला—
वस्था स्यान्निजगोचराचलमनो ध्यानं तदंतर्मुहू—
र्तावस्थानमतीवदुर्धरतया नाऽतः परं तिष्ठति ॥ १२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यात्वोरुतमस्तिरस्कृतसुदृग्ज्ञानोऽधिकक्रोधवान्
स्तब्धः सत्स्वपि वंचनांचितमतिर्लुब्धः परार्थेष्वपि ।
दुर्लेश्यावशगाशयश्च भवति ध्याताऽशुभध्यानयो-
र्ध्येयं ध्यानविशेषलक्षणविनिर्देशक्षणे लक्ष्यते ॥ १३ ॥

जीवाजीवकलत्रपुत्रकनकागारादिकादात्मनः
प्रेमप्रीतिवशात्मसात्कृतबहिःसंगाद्वियोगोद्गमे ।
क्लेशेनेष्टवियोगजार्त्तमचलं तच्चिन्तनं मे कथं
न स्याद्विष्टवियोग इत्यपि सदा मन्दस्य दुःकर्मणः ॥ १४ ॥

क्रूरैर्व्यन्तरचौरवैरिमनुजैर्व्यालैर्मृगैरापदि
प्राप्तायां गरलादिकैश्च महती तन्नाशचिन्ताऽऽपदा ।
संयोगो न भवेत् सदा कथमिति क्लेशातिनुन्नं मनः
श्चार्त्तध्यानमनिष्टयोगजनितं जातं दुरन्तैनसः ॥ १५ ॥

बाधासंजनितार्त्तमर्तिनिहितं स्वान्तं नितान्तास्थिरं
तीव्राद्विश्वपरीषहान्मम कदा विश्लेष इत्यंगिनः ।
दीनस्यास्तविशिष्टवस्तुविषयज्ञानस्य न स्यात्कथं
क्लेशाल्या मम जातु संगम इति क्लिष्टं च तत्स्यान्मनः ॥१६ ॥

नानोपायचयेन नीचचरितैर्भ्रान्त्वा विशालामिला-
माभीलं मकराकरं च बहुशो तुच्छेच्छया प्राप्य यत् ।
प्राप्यं पुण्यवता जनेन कनकं कान्तं च कान्तादिकं
तत्कांक्षाक्षुभिता मतिर्बत निदानार्त्तं महार्तिप्रदम् ॥ १७ ॥

ग्लान्यश्रूद्गमशोकशोषजडतामूर्छांगकंपोत्कता
निःश्वासस्वरभंगकार्ष्ण्यकृशतामौनाऽभिवीक्षामृति-
प्रस्वेदाऽनिमिषेणास्थितिरुजायाञ्चामृषोक्त्यादयः
स्पष्टाः स्वस्य परस्य वाऽऽर्त्तजनितास्तज्ज्ञापकाः कायिकाः १८
अर्त्तिर्दुःखमसातजातजनितं स्यादार्त्तमर्त्तौ भवं
पापाऽऽदाननिदानमार्द्रसिचयं यद्बद्धजःसंश्रयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यादृष्टिगुणादिषड्गुणपदं येन प्रमादास्पदं
दुर्लेश्यात्रयजं सुदुःखजनकं तिर्यग्गतिप्रापकम् ॥ १९॥

हिंसानन्दमसातकारणगणैर्हिंसारुचिर्देहिनां
भेदच्छेदविदारणासुहरणैरन्यैश्च तैर्दारुणैः ।
रोषेर्ष्याद्युदितैरसत्यवचनैरन्यस्य हान्या मृषा-
नंदं रौद्रमसातसन्ततिपदे मिथ्याप्रलापे रुचिः ॥ २० ॥

स्तेयानन्दमवाप्य यत्परधनं वंद्यादिनिंद्यैर्हितै—
रानंदित्वमवाप्तुमुत्सुकतरं चेतश्च तैस्तद्भवेत् ।
स्वं संरक्ष्य विपक्षदूरमुदिता तोषोग्रता या तु सं—
रक्षानंदमपि स्ववस्तु निखिलं निर्वैरि कुर्वे इति ॥ २१ ॥

अक्षापाटवमाननाऽक्ष्यरुणता दाहश्च देहे महान्
हेत्युत्क्षेपविरूक्षवाग्भृकुटयः शक्तिप्रशंसात्मनः ।
स्वेदस्त्वाधरनिष्ठुरग्रहकराघातांगकंपादयः
कार्यांकाः स्वपरावबोधविषयास्तद्रौद्रभावोद्भवाः ॥ २२ ॥

रुद्रःक्रूरतराशयो गतदयो रौद्रं हि रुद्रे भवं
आर्द्रं चर्म यथोरुधूलिनिलयं तद्वत्कुकर्मालयम् ।
पंचस्यादिगुणेषु तीव्रतरतत्कृष्णत्रिलेश्योद्भवं
प्रोद्यत्तीव्रतरार्त्तिनारकगतिप्राप्तेर्निमित्तं मनम् ॥ २३ ॥

ध्याताऽपेतजनोक्तगीतवितताऽऽतोद्यादिकोलाहले
स्थाने स्थावरजंगमांगिरहिते पूते नितांतं समे ।
निश्छिद्रे निरुपद्रवे पृथुशिलेलाद्ये सुखस्पर्शिनि
प्रध्यानाभिरतः स्थितो नियमतः स्वभ्यस्तयोगे त्वयम् ॥२४॥

यानांगावयवप्रचालनवचोजृंभाद्यभावो मुनि-
र्व्युत्सर्गेण समावलंबकशिलास्तंभो निखातो यथा ।
पर्यंकेन यथासुखं स्वमनसः शय्यादिभिर्वा स्थितो
निःसंगोऽस्तसमस्तबाह्यविषयव्यावृत्यशेषेन्द्रियः ॥ २५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणापानविनिग्रहादतितरां भ्रांतिर्मतेरुच्छ्वस—
न्मन्दं मन्दमतो न नेत्रयुगलं सम्यग्निमीलन्न च।
प्रोन्मीलन्दशनैर्मनाग्दशनपंक्त्यग्राणि बिभ्रन्मनः—
शांतिं मूर्त्तिमतीमिवार्त्तिजयिनीं स्वां मूर्त्तिमप्यूर्जिताम्॥ २६॥

सद्दृष्टिर्मृदुताऽऽर्जवादिसहितः श्रेण्योरशेषश्रुतः
स्याद् ध्याता दशपूर्वविच्च नवपूर्वज्ञो परत्राऽपि च
ध्येयन्यस्तमना निरस्तनियमः कालेषु संध्यादिषु
निर्वाणोचितमाद्यसंहननमेवाऽस्मिन्पुनर्ध्यातरि॥२७॥(त्रिकम्)

धर्म्यं शुक्लमिति द्विभेदमुदितं सद्ध्यानमाद्यं तयो-
राज्ञाऽपायविपाकगाच्च विचयात्संस्थानगात्स्याच्चतु- ।
र्भेदं भूरि विकल्पजालकलितं जैनान्नयाच्चैगमा—
त्सर्वं सर्वविदो वचो न हि नयापेतं यतो वस्तु च॥ २८॥

विज्ञातुं न तु शक्यमावृतियुताध्यक्षानुमानादिना-
त्यक्षानंतविवर्त्तवर्त्तिसकलं वस्त्वस्तदोषार्हताम्।
आज्ञावाग्विचयस्तयोक्तमनृतं नैवेति तद्वस्तुन—
श्चिन्ताज्ञाविचयो विदुर्नयचयः संज्ञानपुण्योदयः॥ २९॥

दुःकर्मात्मदुरीहितैरुपचितं मिथ्याविरत्यादिभि-
र्व्यापज्जन्मजरामृतिप्रभृतयो वाऽपाय एनःकृताः।
जीवेनादिभवे भवेत्कथमतोऽपायादपायः कदा
कस्मिन्केन ममेत्यपायविचयः सत्कारणादीक्षणम्॥ ३०॥

गत्यादौ परिणामतस्तनुभृतां प्राप्तोदयोदीरणं
क्लेशाश्लेषकरं सुखोत्करकरं कर्माशुभं तच्छुभम्।
शक्त्या युक्तमसंख्यलोकमितषट्स्थानान्वितस्थानया
इत्येवं विचयो विपाकविचयः प्रत्यस्तदोषोच्चयः॥ ३१॥

संस्थानं यदनित्यताऽशरणता संसार एकाकिता-
ऽन्यत्वं चाशुचिताऽऽस्रवः सुनयतः स्यात्संवरो निर्जरा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोको बोध्यतिदुर्लभत्वमपरो धर्मस्तदित्यन्वितं
भेदैः स्वैर्विचयोऽस्य चिंतनमनुप्रेक्षा स्मृतं द्वादश ॥ ३२ ॥

उत्पत्तिः प्रलयश्च पर्ययवशाद्द्रव्यात्मना नित्यता
वस्तूनां निचये प्रतिक्षणमिहाज्ञानाज्जनो मन्यते ।
नित्यत्वं द्रवदंबुदीपकलिकास्थैर्यं यथार्थादिके
नष्टे नष्टयुतिः करोति बत शोकार्तो वृथाऽऽत्मीयके ॥ ३३ ॥

मंत्रास्तंत्रततिस्तदन्वितकृतिर्दुर्गा द्विषद्दुर्गभा
भृत्याः किं न भृताः सुहृत्ततिरपीत्येतेषु सत्स्वप्यगुः ।
सर्वे पूर्वमहीभृतः क्षतिमतः कस्यापि कालत्रये
त्राताऽत्रास्ति न नाशमीयुषि पुरा पुण्यार्जिते वाऽऽयुषि ॥३४॥

वृत्त्या जातिगतिष्ववाप्तकरणोऽनंतांगहारः सदा
प्रोज्झूतिप्रलयो नरामरमृगाद्याहार्यपर्यायवान् ।
हित्वा सात्त्विकभावजातमितरैर्भावैः स्वकर्मोद्भवै-
र्जीवोऽयं नटवद्भ्रमत्यभिनवः सर्वत्र लोकत्रये ॥ ३५ ॥

कोऽप्यात्मः स्वजनोऽनुगोऽस्ति न परो वा याति जन्मांतरं
जीवे जन्मनि वाऽत्र मित्रनिकरैः किं नाशितं वा हृतम् ।
चित्रं गात्ररुजादिजं हृदयजं वाऽसातमेकस्ततो
मृत्युत्पत्तिनिवृत्तिषु प्रणयिनोऽन्येऽर्थेष्वनर्थो निजः ॥ ३६ ॥

चैतन्यं जडतैकताऽव्ययविसंदोहोदिताऽनेकता
नित्यत्वं क्षयिता च मूर्त्तिवियतिर्मूर्तत्वमित्यादिभिः ।
भेदं देहिशरीरयोरगणयन् किं नेक्षते बुद्धिम-
द्देहं खेदिनि देहिनि स्थितमतिक्रांतेऽत्र दुर्मित्रवत् ॥ ३७ ॥

रेतः शोणितजातिधातुनिचितं प्रच्छादितं चर्मणा
सान्द्रोद्रिक्तगलन्मलं बहुविलैरंगं जुगुप्सानुगम् ।
भीतिं किं न तनोत्यसंस्कृतिबहिश्चर्मात्रगात्रे न चेत्
स्प्रष्टुं द्रष्टुमपि क्षमोऽस्ति किमिदं त्रातुं पतत्र्यादितः ॥ ३८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देहे स्नेहयुते लगत्यविरतं रेणोर्गणोऽयं यथा
मिथ्यावृत्तकषाययोगकलुषेऽजस्रं सजंत्यंगिनि ।
तद्वत् स्वैकशरीरगाः सुमिलिताऽनंताणवो वर्गणा
विश्वात्मावयवेष्वनंतगणना नो कर्मणां कर्मणाम् ॥ ३९ ॥

दृष्टे दुष्टविषाहिनांऽगिनि यथा नष्टप्रचेष्टे विषं
पुण्यज्जांगुलिकेन मंत्रबलिना संस्तंभितं तिष्ठति ।
सम्यक्त्वव्रतनिष्कषायपरिणामाऽयोगताभिस्तथा
मिथ्यात्वादिचतुःस्वहेतुविगमाच्छून्नैनसां नागमः ॥ ४० ॥

संश्लिष्टात्मबलस्य निर्गलनतो निःशेषविश्लेषत-
श्चान्तर्बाह्यचतुः स्वहेतुवशतः स्वर्णोपले स्वर्णता ।
यद्वद्देहिनि कर्मणोंऽशगलनान्निःशेषविश्लेषतः
सम्यक्त्वग्रहणाद्यनेककरणैस्तद्वद्विशुद्धात्मता ॥ ४१ ॥

मध्यांशः परितोऽप्यनंतवियतो लोकस्त्रिधाताऽऽवृतः
पंचद्रव्यचितः प्रकर्तृरहितो नित्यः सदाऽवस्थितः ।
संस्थानेन तु सुप्रतिष्ठकसमोऽसंख्यप्रदेशप्रभो
मध्यस्थत्रसनालिरत्र भविना स्पृष्टुं न दृष्टुं पदम् ॥ ४२ ॥

नैकाक्षैर्विकलाक्षपंचकरणासंज्ञव्रजैर्जातु या
लब्धा बोधिरगण्यपुण्यवशतः संपूर्णपर्याप्तिभिः ।
भव्यैः संज्ञिभिराप्तलब्धि विधिभिः कौश्चित्कदाचित् क्वचित्
प्राप्या सा रमतां मदीयहृदये स्वर्गापवर्गप्रदा ॥ ४३ ॥

दाताऽभीष्टविशिष्टवस्तुनिचयस्याकांक्षिणेऽपि क्षणा-
द्धर्त्तार्त्तेर्नरनारकादिभवसंभूतेः स्मृतेर्भीकृतेः ।
हंताऽऽक्रान्तजगत्त्रयांतकरिपोर्यः स्वान्तगः संस्तुत-
स्त्राताऽत्राणशरीरिणां न हि परो धर्मात्सुशर्मप्रदात् ॥ ४४ ॥

श्रद्धानं सदशंकितादिसदनं तत्त्वार्थसंचिन्तनं
संवेगः प्रशमोदयेन्द्रियदमः प्राज्योद्यमः संयमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैराग्यं वरगुप्तिताऽतिमृदुता निर्मोयिताऽसंगता
धर्मस्येति समस्तवस्तुपरमोपेक्षा च लक्ष्मोदितम् ॥ ४५ ॥

धर्म्यं स्यान्निखिलार्थसार्थनिहितं चित्तं समं संस्थितं
सम्यग्दृष्ट्यणुव्रतादिसप्तमगुणांतेषु प्रवृद्धं क्रमात् ।
साक्षात्संवरनिर्जरादिकरणं नानात्मनां कर्मणां
सल्लेश्यात्रयजं च नाकसुखदं प्राग्रं क्रमात्सिद्धिदम् ॥ ४६ ॥

शुक्लध्यानमतश्चतुर्विधमिदं प्रोक्तं वितर्कौ पृथ-
क्त्वैकत्वानुगतावुभावपि सवीचारेतरौ स्तः क्रमात् ।
कार्यस्यातिशयेन जातपरमाह्लानं तु सूक्ष्मक्रियं
ध्यानं ह्यप्रतिपाति तादृशसमुच्छिन्नक्रियं चेत्यपि ॥ ४७ ॥

आद्यं शुक्लमनेकधा स्वविषये वृत्त्या पृथक्त्वेन यत्
सर्वद्रव्यगतश्रुतस्य परमस्यास्मिन् वितर्कस्य यः ।
संचारोऽर्थवचस्त्रियोगमहने वीचार एषो भवे-
द्ध्यानं सार्थकनामधाम तदिदं स्यादिष्टसंपत्प्रदम् ॥ ४८ ॥

एकत्वेन न पर्ययान्तरतया जातो वितर्कस्य य-
द्यो वीचार इहैकवस्तुनि वचस्येकत्र योगेऽपि च ।
नार्थव्यंजनयोगजालचलनं तत्सार्थनामेत्यदो
ध्यानं घातिविघातजातपरमार्हन्त्यं द्वितीयं मतम् ॥ ४९ ॥

शुक्लेऽभ्यन्तरबाह्यकारणगणो न्यक्षं च तल्लक्षणं
धर्म्ये वा प्रथमं क्षयोपशमयोर्मोहस्य हेतुर्द्वयोः ।
श्रेण्योर्मोक्षविनाकदं विलयकृद्घातित्रयस्थापरं
वर्यं क्षीणकषाय एव यमलं तच्छुक्ललेश्योद्भवम् ॥ ५० ॥

ध्यानं चिन्तनमेकवस्तुनि कियत्कालं मतं तच्छुत-
ज्ञानं स्यावरणक्षयोपशमजं ध्यानोपचारस्ततः ।
शश्वद्विश्वनिरन्तरावृतिहतिप्रत्यक्षबोधेऽर्हति
कर्मस्थित्यनुभागघातगलनाद्यर्थस्य तत्रेक्षणात् ॥ ५१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मा कृष्टिगता क्रियेति तनुगो योगोऽत्र सूक्ष्मक्रियं
ध्यानं ह्यप्रतिपात्यनश्वरमिदं नामाऽस्य तत्सार्थकम् ।
तन्नात्युद्यतराघघातनसमुद्घातक्रियाऽनन्तरं
योगिन्यर्हति जीविते समुदभूदन्तर्मुहूर्ते स्थिते ॥ ५२ ॥

योगोऽस्मिन्प्रहतो बभूव हि समुच्छिन्नक्रियं सुस्थितं
ध्यानं ह्यप्रतिपाति तेन तदभूदन्वर्थनामास्पदम् ।
लेश्यातीतमयोगकेवलिजिने शुक्लं चतुर्थं वरं
निर्मूलप्रविलीनसंसृतिगदं स्वात्मोपलब्धिप्रदम् ॥ ५३ ॥

संस्कारातिशयः प्रसन्नहृदयस्त्यागी क्षमी प्रोद्यमी
प्रव्यक्तस्वपरस्थितिः शुभवचोरत्नावलीराजितः ।
शूरः शीलपरो गुणस्थिररुचिर्भव्योऽभिमानी परं
साध्वीं साधयति स्वभावसुभगामाराधनां नायिकाम् ॥ ५४ ॥

शेषेऽल्पे निजजीवने जनहितं देशं महीशान्वितं
नानाजैनजनास्पदं सुखपदं सत्संगिनां योगिनाम् ।
संप्राप्यात्ममनोगतं बहुमतं सम्यङ्निवेद्य स्थितः
सूरिभ्यः सकलैश्च तैः सुविदितः संघान्वितैः स्वीकृतः ॥ ५५ ॥

आचार्यैः परिचर्ययाऽऽहितहितैः सद्भूनपंचाशता
द्वाभ्यां वाऽतिजघन्यतः परिवृतः प्रीत्याप्तमार्थार्थ्यतः ।
आलोच्याऽऽत्मकृतं कृती त्रिकरणैर्दोषं विशुद्धाशयः
श्रुत्वातः प्रवरं प्रतिक्रमणमप्यारुह्य सत्संस्तरम् ॥ ५६ ॥

प्राज्ञोऽसौ क्रमशोऽशनं परिहरन्नेकैकमास्वाद्य त-
त्सम्यग्दर्शितमिष्टमिष्टमसकृत्कांक्षाक्षयार्थं बुधैः ।
हित्वाऽतस्त्रिविधाशनं धृतिकरं किं स्तोकमेतन्मया
भुक्तात्पूर्वमनेकमेरुमहतो मे तृप्तिकस्येत्यतः ॥ ५७ ॥

त्यक्त्वाऽतः कुशलः क्रमेण विविधं धीरः समाध्यात्तये
पानं सिक्थयुतं विलेपि सरसं निःस्नेहमच्छं पयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं तृप्तिर्भवतीयती भवभवे पीतादृजातेत्यतो
नानानीरधिनीरतोऽतिमहतो मे कर्मघर्मार्त्तिनः ॥ ५८ ॥
ज्ञाताऽऽस्वादसमस्तवस्तुभिरलं बाह्यैरसारैः परं
जैनेन्द्रं वचनामृतं जननमृत्यातंकनाशीति तत् ।
धृत्वा पंचगुरून्मनस्यविचलं तन्मंत्रमुच्चारयन्
धर्म्यं शुक्लमपि प्रकृष्टफलदं ध्यायंस्तनुं व्युत्सजेत् ॥ ५९ ॥
(चतुष्कम्)
देवैस्तिर्यगचेतनैश्च मनुजैः प्राप्तोपसर्गस्तदा
त्यक्त्वाऽऽहारशरीरसंगमखिलं बाधाऽविरामावधि ।
सावद्यं सकलं च निर्मलमना ध्याने प्रशस्ते स्थित-
स्तिष्ठेत्पंचगुरूनभिमतफलप्राप्त्यभ्युपायानपि ॥ ६० ॥
इंगिन्यां चान्यसंपादितहितविरतौ वर्णितो योऽत्र भक्त-
प्रत्याख्याने क्रमोऽसौ निरतिशयमृतौ स्वोपकारप्रवृत्तौ ।
ज्ञेयः प्रायोपगत्यां स्वपरहितकृत्यक्रवांच्छाप्रवृत्तौ
ताभिः सप्ताष्टजन्मस्वपगतदुरिता मोक्षलक्ष्मीं लभन्ते ॥६१ ॥
दीक्षामादाय शिक्षामथ गणधरतां रक्षणार्थं गणस्य
संस्कारं स्वस्य भावैः शमदमविभवैर्योऽत्र सल्लेखनां च ।
क्रोधादीनां विधाय प्रथितपृथुयशाः साधयेदुत्तमार्थं
सः स्यात्सद्भव्यसस्योत्पलनिकरमुदे मेघचन्द्रो मुनीन्द्रः॥६२॥
श्रेयोनाथ ! सरस्वतीश्वरतया रत्नाकरत्वेन तु
गांभीर्येण वरेण निर्मलतया वार्द्धिः समोस्तु त्वया ।
किं वंद्या जलधेः सदा प्रमुदितत्रैलोक्यसंसेव्यता
लक्ष्मीश्चाक्षयसंगमाऽस्ति परमा मूर्त्तिर्मनोहारिता ॥ ६३॥

इति श्रीमद्वीरनन्दिसिद्धान्तिचक्रवर्तिप्रणीते श्री 'आचारसार' नाम्नि ग्रन्थे ध्यानवर्णनात्मको दशमोऽधिकारः ॥ १० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैकादशोऽधिकारः ॥ ११ ॥

श्रियं ममैनस्तिमिरक्षयोज्ज्वलां
सन्मार्गगः श्रीविमलः क्रियात्सदा ।
जिनो निजानंतवरैर्गुणोत्करै-
र्विराजमानो जनताब्जभास्करः ॥ १ ॥

जीवस्य कर्मणो भेदवेदनायेदमुच्यते ।
संक्षेपेणाह्नसंज्ञात्यै जीवकर्मप्ररूपणम् ॥ २ ॥
जीवो गुणोऽस्य पर्याप्तिः प्राणः संज्ञा तु मार्गणाः ।
चतुर्दशोपयोगश्चेत्याद्यं विंशतिभेदगम् ॥ ३ ॥
त्रसादीनां चतुर्युग्मेष्वविरुद्धोदयान्वितात् ।
जातिकर्मोदयाज्जीवसमासाः स्युश्चतुर्दश ॥ ४ ॥
त एते स्थूलसूक्ष्मैक क्षद्वित्रिचतुरिन्द्रियाः ।
संज्ञ्यसंज्ञ्यंगिपंचाक्षपर्याप्तेतरसंज्ञकाः ॥ ५ ॥
संगृहीतविशेषद्विसामान्यत्वादितीरिताः ।
नैगमाश्रयणादेवमन्यत्राऽपि निरूपयेत् ॥ ६ ॥ (युग्मम्)
सचित्ताऽचित्तमिश्रोष्णा शीता मिश्रा च संवृता ।
विवृतेत्यंगिनामष्टौ स्युः सन्मूर्च्छनयोनयः ॥ ७ ॥
सचित्ताचित्तयोर्मिश्रा संवृतेतरयोरपि ।
शीतोष्णमिश्राः पंचैवं जीवानां गर्भयोनयः ॥ ८ ॥
उपपादयोनयः स्युः शीतोष्णाचित्तसंवृताः ।
संवृतैकेन्द्रियेऽन्येषु विवृतोष्णा त्वग्निकायिके ॥ ९ ॥
जरायुजाण्डजपोताः स्युर्गर्भेऽप्येवोपपादिकाः ।
नाकिनो नारकाश्चान्ये स्युः सम्मूर्छनयोनयः ॥ १० ॥
सप्तसप्तनिगोदद्व्योर्वीतोयाग्निवायुषु ।
प्रत्येके दशयोनीनां षडर्पिंडद्विकलेन्द्रिये ॥ ११ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचाक्षे नारके देवे चत्वारि तु चतुर्दश ।
नरे चतुरशीतिः स्युर्लक्षाण्येव विशेषतः ॥ १२ ॥
न जन्म शंखावर्त्तायां तीर्थेशाश्चक्रिणो बलाः ।
कूर्मोन्नतायां स्युश्चान्ये वंशपत्राकृतौ परे ॥ १३ ॥
आदीन्द्रके त्रिहस्ताः स्युराद्यव्यर्थमन्तिमेन्द्रके ।
सप्तचापास्त्रिहस्ताश्च षडंगुल्यस्तनूच्छ्रयः ॥ १४ ॥
द्वितीयाद्युर्वरान्तेन्द्रकेषु स्याद्द्विगुणः क्रमात् ।
नारकाणामयं हानिवृद्धी स्यातां परेषु तु ॥ १५ ॥
ऋज्व्या गत्या समुत्पन्नस्तृतीयसमये वरः ।
देहः सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्य च ॥ १६ ॥
पल्याऽसंख्येयभागेन विभक्तं स्याद्घनांगुलम् ।
चतुर्वृद्धियुतोऽप्यस्मादालापादीदृशो मतः ॥ १७ ॥
लब्धिनिर्वृत्यपर्याप्तपर्याप्तेष्ववरो वरः ।
निर्वृत्यऽपूर्णपूर्णेषु विशेषः केषुचिद्यथा ॥ १८ ॥
घनांगुलस्य संख्येयभागः स्यादवरः क्रमात् ।
पूर्णद्वित्रिचतुःपंचाक्षाणां संख्यातसंगुणः ॥ १९ ॥
तज्जघन्यमणुंधर्या कुंथावप्यवगाहनम् ।
स्यात्काणमक्षिकायां च सिक्थमत्स्ये यथाक्रमम् ॥ २० ॥
वरं त्रिचतुर्द्यक्षा प्रतिष्ठितेंगमपूर्णके ।
पंचाक्षे च ततः पूर्णेऽमीषां संख्यातसंगुणम् ॥ २१ ॥
जंबूद्वीपः सुवृत्तोऽसौ मध्यलोकाऽतिमध्यगः ।
लक्षयोजनविस्तारस्ततः स्याल्लवणार्णवः ॥ २२ ॥
धातकीखंडद्वीपोऽतः स्यात्कालोदकवारिधिः ।
स्तः पुष्करवरौ द्वीपसागरौ वारुणीवरौ ॥ २३ ॥
तथा क्षीरवरक्षौद्रवरनन्दीश्वरादयः ।
मध्ये प्रशस्तनामानोऽसंख्येयाः समनामकाः ॥ २४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वयंभूरमणद्वीपसागरावन्तसंस्थितौ ।
सर्वे सार्द्धद्विकोद्धारसागरोपमसम्मिताः ॥ २५ ॥

जंबूद्वीपात्तु विष्कंभा द्विगुणाद्विगुणाः क्रमात् ।
पूर्वं पूर्वं परिक्षिप्ता वलयाकृतयोऽखिलाः ॥ २६ ॥

स्वस्वनामरसास्वादा लवणो वारुणीवरः ।
वार्द्धी क्षीरघृतवरौ चत्वार इति कीर्त्तिताः ॥ २७ ॥

कालोदकपुष्करवरस्वयंभूरमणार्णवाः ।
जलास्वादास्त्रयः क्षौद्ररसाः शेषास्तु सागराः ॥ २८ ॥

आमानुषोत्तरान्मर्त्या यतः सोन्वर्थसंज्ञकः ।
पुष्करद्वीपमध्यस्थः स गिरिर्वलयाकृतिः ॥ २९ ॥

स्वयंभूरमणद्वीपमध्यस्थाद्वलयाकृतेः ।
स्वयंप्रभाचलात्सर्वा कर्मभूमिर्बहिः स्थिता ॥ ३० ॥

स्वयंप्रभाचलादारात्परतो मानुषोत्तरात् ।
मध्याभूरन्तरद्वीपा जघन्या भोगभूमयः ॥ ३१ ॥

क्रोशोनं योजनं दैर्घ्यमेकं द्वादश साधिकम् ।
सहस्रयोजनं गोभ्यां भृंगे शंखेऽम्बुजे वरम् ॥ ३२ ॥

सम्मूर्च्छेनजपर्याप्ते स्वयंभूरमणांबुधौ ।
सहस्रयोजनं मत्स्ये सरित्संगेऽस्य तद्वलम् ॥ ३३ ॥

लवणाब्धौ सरित्संगमेऽस्याष्टादशतद्वलम् ।
कालोदकाब्धौ तत्सिंधुसंगे च द्विगुणं ततः ॥ ३४ ॥

जलस्थलखगापूर्णे खगपूर्णे च गर्भजे ।
सम्मूर्च्छेनस्थलखगे पूर्णे चापृथक्त्वगः ॥ ३५ ॥

जलस्थलखगापूर्णे स्यात्सम्मूर्च्छेनजन्मनि ।
वरो वितस्तिर्देहाल्पः कुंथुमात्रः पयश्चरे ॥ ३६ ॥

---

१ रक्तवृश्चिके ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलगे गर्भजे पूर्णे स्यात्पंचशतयोजनम् ।
स्थलगे गर्भजे पूर्णे त्रिकोशं तिर्यगंगिनि ॥ ३७ ॥
त्रिभोगभूजे त्रिद्व्येकक्रोशाः स्युः कर्मभूमिजे ।
चापाः पंचशतं पंचविंशतिश्च नरे वरम् ॥ ३८ ॥
चापाः स्युरसुरे पंचविंशतिः शेषभावन-
व्यन्तरेषु दशोत्सेधो ज्योतिष्के सप्त देहगः ॥ ३९ ॥
कल्पेषु द्विद्विचतुर्षु स्युश्चतुर्षु द्वयोर्द्वयोः ।
सप्त षट् पंच चत्वारस्त्रयः सार्द्धाः करास्त्रयः ॥ ४० ॥
त्रित्रित्रिभैवेयकेष्वनुदिशानुत्तरेष्वतः ।
स्युः सार्द्धद्विद्विद्व्यर्द्धैककराः काये दिवौकसाम् ॥ ४१ ॥
कुलानां कोटिलक्षाणि स्युर्भूतोयाग्निवायुषु ।
द्व्युत्तरा विंशतिः सप्त त्रीणि सप्त यथाक्रमम् ॥ ४२ ॥
अष्टाविंशतिः सप्ताष्टौ नवार्द्धोनत्रयोदश ।
वनस्पतौ द्व्यक्षे त्र्यक्षे चतुरक्षे पयश्चरे ॥ ४३ ॥
नव दश द्वादशोरःपरिसर्पे चतुष्पदे ।
विहंगे द्वादश नरे नारके पंचविंशतिः ॥ ४४ ॥
देवे षड्विंशतिस्तेषां कोटिलक्षाणि पिंडतः ।
सार्द्धसप्तनवत्यग्रशतमात्राणि देहिनाम् ॥ ४५ ॥
भौमभावनयोरायुर्जघन्यं चादिमेन्द्रके ।
दशाब्दानां सहस्राणि घर्मायां नवतिर्वरम् ॥ ४६ ॥
लक्षाणां नवतिः पूर्वकोट्योऽसंख्या दशांशकः ।
रत्नाकरोपमस्यास्यां द्वितीयादीन्द्रकत्रये ॥ ४७ ॥
एकत्रिसप्ताद्युपमा दश सप्तदश क्रमात् ।
द्वाविंशतिस्त्रयस्त्रिंशदाद्युर्व्याद्यन्तिमेन्द्रके ॥ ४८ ॥
प्रथमादिवरायुष्यं समयोत्तरमीरितम् ।
द्वितीयादिजघन्यायुरिति कल्पेष्वयं क्रमः ॥ ४९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयुरन्तर्मुहूर्त्तः स्यादेषोऽप्यष्टादशांशकः ।
उच्छ्वासस्य जघन्यं तृतिरश्वां लब्ध्यपूर्णके ॥ ५० ॥

शुद्धोर्व्यायुः सहस्राणि द्वादश द्व्यग्रविंशतिः ।
खरोर्व्यां सप्त वर्षाणां तोयेऽग्नौ स्यादिनत्रयम् ॥ ५१ ॥

त्रीण्यब्दानां सहस्राणि वायुजीवे वनस्पतौ ।
सहस्राणि दश द्यक्षे द्वादशाब्दानि केवलम् ॥ ५२ ॥

दिनान्येकोनपंचाशत् त्र्यक्षे स्युश्चतुरिन्द्रिये ।
मासाः षड्विहगेऽब्दानां सहस्राणि द्विसप्ततिः ॥ ५३ ॥

द्विचत्वारिंशदब्दानां सहस्राणि भुजंगमे ।
नवोऽरःपरिसर्पाणां पूर्वांगानि वरायुषि ॥ ५४ ॥

पूर्वकोट्यवरे संज्ञिन्यप्येतौ भोगभूमिषु ।
त्रसाः सम्मूर्च्छिनो ये च न भवन्ति स्वभावतः ॥ ५५ ॥

जघन्यमध्यमोत्कृष्टभोगभूमिष्ववस्थितम् ।
स्यादेकद्वित्रिपल्यायुर्नित्यास्वन्यासु तद्वरम् ॥ ५६ ॥

पूर्वकोट्येकपल्यं च पल्यद्वयमिति त्रयम् ।
समयेनाधिकं तासु तृतिर्यक्त्ववरं क्रमात् ॥ ५७ ॥

कर्मभूमिषु सर्वासु पूर्वकोटी मता स्थितिः ।
वरार्यम्लेच्छखंडोत्थवियच्चरनरेषु तु ॥ ५८ ॥

पूर्वकोटी वरं कर्मभूष्वायुस्तुर्यकालवत् ।
अनित्यकर्मभूषु स्यान्म्लेच्छविद्याधरक्षितौ ॥ ५९ ॥

असुरेऽर्णवोपमः स्यान्नागे पल्यत्रयं क्रमात् ।
सुपर्णद्वीपशेषेषु भौमे चार्द्धार्द्धहीनकम् ॥ ६० ॥

लक्षसहस्रशताब्दैर्युक्तं पल्यं विधाविने ।
शुक्रे क्रमाद्गुरौ पल्यं ग्रहेष्वन्येषु तद्दलम् ॥ ६१ ॥

परा पल्यचतुर्भागः स्थितिस्तारासु तद्दलम् ।
जघन्या पल्यमेकं स्यात्सौधर्मेशानकल्पयोः ॥ ६२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवेषु द्वौ वरा सप्त स्थितिर्दश चतुर्दशः ।
कल्पे द्वाविंशतिर्यावत् द्व्युत्तराः सागरोपमाः ॥ ६३ ॥
उपर्येकोत्तरस्तावत्स्युस्त्रयस्त्रिंशदन्तिमे ।
सौधर्मैशानजा एव देव्यः स्युः स्वस्वकल्पगाः ॥ ६४ ॥
अल्पं कल्पद्वये पल्यं साधिकं जीवनं वरम् ।
सौधर्मे पंच पल्यानि तान्यैशानादिषु क्रमात् ॥ ६५ ॥
एकादशसु कल्पेषु द्व्यधिकानि तु चतुर्व्यतः ।
सप्तोत्तराणि देवीनामहमिन्द्रस्ततः परम् ॥ ६६ ॥
यत्किल्विषिकसम्मोहा लान्तवान्तं भवन्ति ते ।
अच्युतावधि कंदर्पा आभियोग्यसुरा अपि ॥ ६७ ॥
सारस्वतादयो ब्रह्मलोके लौकान्तिकामराः ।
तेषामष्टावरिष्टे तु नवायुः सागरोपमाः ॥ ६८ ॥
आहारस्मृतिरुच्छ्वासः सागरोपमसंख्यकैः ।
समासहस्रैः पक्षैश्च यथासंख्यं सुरायुषि ॥ ६९ ॥
मिथ्यादृष्टिः सासादनो मिश्रः सुदृगसंयतः ।
देशव्रती प्रमत्तः स्यादप्रमत्तश्च संयतः ॥ ७० ॥
स्यातामपूर्वकरणानिवृत्तिकरणौ ततः ।
स्युः सूक्ष्मसांपरायोपशान्तक्षीणकषायकाः ॥ ७१ ॥
जिनः सयोगोऽयोगः स्युश्चतुर्दश गुणा इति ।
मोहयोगसमुद्भूताः सिद्धास्तद्गुणनिर्गताः ॥ ७२ ॥ (त्रिकम्)
स्युराहारशरीराक्षोच्छ्वासभाषामनस्त्विमाः ।
पर्याप्तयः समन्तादात्मस्थशक्तिसमृद्धयः ॥ ७३ ॥
सादिदेहोदयादासां प्रारंभोऽक्रमतः क्रमात् ।
अन्तर्मुहूर्ते निष्पत्तिरपर्याप्तिस्त्वपूर्णता ॥ ७४ ॥
एकाक्षे विकलाक्षेषु चासंज्ञिनि संज्ञिनि ।
चतस्रः पंच पंचैताः षड् भवन्ति यथाक्रमम् ॥ ७५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नारकाणां खरः कायोऽत्यशुभाभिश्चविक्रियः ।
करालः कालो दुर्गन्धो धातूनोन्तर्मुहूर्त्ततः ॥ ७६ ॥
अणिमादिगुणं सप्तधात्वपेतं मनोहरम् ।
जायतेऽन्तर्मुहूर्तेन देवांगे नवयौवनम् ॥ ७७ ॥
पंचाक्षायुर्मनोवाक्कायाऽऽनापाना दशांगिनः ।
प्राणंत्येभिरिति प्राणा बाह्यैरन्नादिभिर्यथा ॥ ७८ ॥
संज्ञयादौ स्युर्दशैकैकहीनास्तेन्त्ये द्विवर्जिताः ।
पूर्णे त्वपूर्णके सप्त सप्तैकैकविहीनकः ॥ ७९ ॥
संज्ञा वाञ्छाश्चतस्रः स्युरत्राऽमुत्र च दुःखदाः ।
आहारे भयतो मैथुनेंगिनां ताः परिग्रहे ॥ ८० ॥
ते गताविन्द्रिये काये योगे वेदकषाययोः ।
संयमे दर्शने ज्ञाने लेश्याभव्यत्वयोरपि ॥ ८१ ॥
सम्यक्त्वसंज्ञित्वाऽऽहारे गुणिनो मार्गणा इति ।
मृग्यन्त एभिरिति वा स्वकर्मभ्यश्चतुर्दश ॥ ८२ ॥ (युग्मम्)
गतयो नारकतिर्यङ्मनुष्यामरपर्ययाः
चतस्रो गतिकर्माणि तन्निर्मापकानि वा ॥ ८३ ॥
स्पर्शनादीन्द्रियैर्युक्ता रसनाद्यैकवृद्धिभिः ।
एकद्वित्रिचतुःपंचाक्षांगिनः स्वोक्तकर्मभिः ॥ ८४ ॥
भूवारिवन्हिवातांगा ये वनस्पतिकायिकाः ।
स्थूलाः सूक्ष्माश्च ते सर्वे भवंत्येकेन्द्रियांगिनः ॥ ८५ ॥
शंखशुक्तिनखक्षुल्लकक्षोदिककपर्दिकाः ।
गंडूपदोदरकृम्याद्याश्च ते द्वीन्द्रियांगिनः ॥ ८६ ॥
गोभीन्द्रगोपवृश्चिकघूकालिक्षापिपीलिकाः ।
कुन्थुस्त्रीमत्कुणाद्याश्च जिनेन्द्रैस्त्रीन्द्रियाः स्मृताः ॥ ८७ ॥
मृगः पतंगः कीटश्च दंशो मशकमक्षिके ।
मधु गोमक्षिकाद्याश्च देहिनश्चतुरिन्द्रियाः ॥ ८८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलस्थलखगास्ते ये मीननागशुकादयः ।
ज्ञेयाः पंचेंद्रियाः सर्वे नारकाश्च नराः सुराः ॥ ८९ ॥
पृथिव्यप्तेजोवायुवनस्पतित्रसकायिकाः ।
जीवाः षडिति पृथ्व्यादिनामकर्मविशेषजाः ॥ ९० ॥
मसूरिकापयोबिन्दुसूचीवृन्दध्वजोपमाः ।
कायाश्चतुर्षु पृथ्व्यादिष्वन्त्ययोर्विविधाः स्मृताः ॥ ९१ ॥
समचतुरस्रं न्यग्रोधस्वाती द्वे च वामनम् ।
कुब्जं हुंडमिति प्रोक्तं संस्थानं षड्विधं जिनैः ॥ ९२ ॥
हुंडं पुंनारकैकाक्षाद्यसंज्ञ्यंतेषु सामरे ।
भोगभूजे भवेदाद्यं सर्वाण्यन्येषु देहिषु ॥ ९३ ॥
रसरत्नशिलालोहवालुकागैरिकादयः ।
मृदश्च पृथ्वीतत्कायाः पृथिवीकायिकांगिनः ॥ ९४ ॥
नदीनदसमुद्रादिजलवर्षाम्बुसीकराः ।
स्युः प्रालेयादयश्चापस्तदप्कायाः स्वकायिकाः ॥ ९५ ॥
स्युरंगाराः स्फुलिंगाश्च ज्वालाश्चाप्यन्यवन्हयः ।
तेजांसि तच्छरीरा ये ते तेजस्कायिकाः स्मृताः ॥ ९६ ॥
वातो वात्या महावाता व्यजनादिभवाश्च ये ।
ते वातास्तच्छरीराः स्युरंगिनो वातकायिकाः ॥ ९७ ॥
ते वनस्पतयो वृक्षक्षुपवल्लीतृणादयः ।
उद्वेजनक्रियाभाजस्त्रसाः स्युर्द्वीन्द्रियादयः ॥ ९८ ॥
कर्मादाननिमित्तात्मप्रयत्नो योग इष्यते ।
देहनामैनसः पाकात्प्रदेशस्पंदलक्षणः ॥ ९९ ॥
मनोयोगः स वाग्योगः काययोग इति त्रिधा ।
मनोवचनपर्याप्तिकायवत्सु क्रमेण नुः ॥ १०० ॥
स्त्री पुमान् षण्ढ इत्येवं भावा वेदास्त्रयोऽंगिषु ।
ते स्त्रीपुंषण्ढवेदैनः प्रदेशोदयसंभवाः ॥ १०१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीपुंवेदाः सुरा भोगभूमिजाताश्च नारकाः ।
षण्ढाः सम्मूर्च्छिनश्चान्ये तृतिर्यञ्चस्त्रिवेदिनः ॥ १०२ ॥
ईशानान्ते प्रवीचारः स्याद्वयोस्त्रिचनुर्ष्वतः ।
शरीरे स्पर्शे रूपे च शब्दे चित्ते ततो न सः ॥ १०३ ॥
चतुःकषायाः क्रुन्मानमायालोभा विपाकजाः ।
चतुःकषायाः सामान्यक्रोधादिद्रव्यकर्मणः ॥ १०४ ॥
ज्ञानमष्टविधं ज्ञातं पुरा स्युः सप्त संयमाः ।
चारित्रपंचकं देशसंयमासंयमान्वितम् ॥ १०५ ॥
प्रत्याख्यानकषायोदयेन स्याद्देशसंयमः ।
विविधाऽसंयमो भावोप्रत्याख्यानकषायतः ॥ १०६ ॥
दर्शनं ग्रहणं सामान्यात्मनस्तच्चतुर्विधम् ।
अचक्षुश्चक्षुरवधिः केवलं चेति वर्णितम् ॥ १०७ ॥
चक्षुःशेषेन्द्रियज्ञानहेत्वचक्षुरचक्षुषी ।
विभंगावधिहेतुः स्यादेकं त्ववधिदर्शनम् ॥ १०८ ॥
चक्षुरचक्षुरवधिदर्शनावरणैनसाम् ।
क्षयोपशमतश्चक्षुर्दर्शनादित्रयं भवेत् ॥ १०९ ॥
समं केवलबोधेन केवलं दर्शनं भवेत् ।
निजावरणनिःशेषक्षयात्क्षायिकमक्रमात् ॥ ११० ॥
कृष्णनीलकपोताख्या लेश्यास्तिस्रोऽशुभाः शुभाः ।
स्युस्तेजःपद्मशुक्लाख्याः कषायोन्मिश्रयोगजाः ॥ १११ ॥
निर्वाणयोग्यता भव्यताऽन्याऽनिर्वाणयोग्यता ।
अष्टकर्मोदयाज्जाते अप्येते पारिणामिकौ ॥ ११२ ॥
षट् सम्यक्त्वानि पूर्वोक्तवेदकादिरुचित्रयम् ।
मिथ्यात्वसम्यङ्मिथ्यात्वसासादनगुणैः सह ॥ ११३ ॥
मिथ्यात्वकर्मणः पाकान्मिथ्यात्वं मिश्रता भवेत् ।
सम्यङ्मिथ्यात्वकर्मोदयात्तु श्रद्धानघातिनः ॥ ११४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हड्योहस्योदयादिभ्यो यन्न सासादनो गुणः ।
जात औदयिकोऽपि स्यात्तदयं पारिणामिकः ॥ ११५ ॥

संज्ञित्वं समनस्कत्वं शिक्षाऽऽदानादियोग्यता ।
भवेदसंज्ञिता संज्ञिलक्षणालक्षितेत्वतः ॥ ११६ ॥

नोकर्माऽऽदानमाहारः सादिदेहत्रयोदयात् ।
नोकर्माऽऽहरणाभावस्त्वनाहारः प्ररूपितः ॥ ११७ ॥

साकार उपयोगः स्यादुपयोगोऽष्टबोधजः ।
अनाकारश्चतुर्दर्शनोत्थस्तौ जीवलक्षणम् ॥ ११८ ॥

तृतिर्यक्संज्ञिपर्याप्तकर्मभूगर्भजे जनिः ।
सुराणां नारकाणां च सप्तम्याः स्यात्तिरश्चि तु ॥ ११९ ॥

तीर्थेशाश्चरमांगाश्च संयता देशसंयताः ।
तुर्यादिसप्तम्यंताभ्यश्च्युता नो नारकाः क्रमात् ॥ १२० ॥

नारकोऽनन्तरं न स्याच्चक्रेशः केशवो बलः ।
शलाकपुरुषा नैव तृतिर्यग्भावनत्रयम् ॥ १२१ ॥

च्युतो न केशवोऽनुदिशानुत्तरविमानतः ।
संज्ञिपूर्णेषु जायन्ते आसहस्रारतश्च्युताः ॥ १२२ ॥

भवन्त्यनन्तरं देवा ये आईशानतश्च्युताः ।
अप्रतिष्ठितप्रत्येकस्थूलभूतोयपूर्णगाः ॥ १२३ ॥

तिर्यक्षु मर्त्यतिर्यंचस्ते तेजोवायुवर्जिताः ।
तृषु पंचेंद्रियाः पूर्णा नारकेष्वमरेष्वपि ॥ १२४ ॥

अष्टवारादद्विवारान्तं घर्मोर्व्यादिष्वसंज्ञिनः ।
सरीसृपाः खगाः सर्पाः सिंहाः कान्ता नराप्सराः ॥ १२५ ॥

भौमभावनयोः पूर्णा असंज्ञी भोगभूमिजाः ।
तापसप्रवराश्चापि जायन्ते भुवनत्रये ॥ १२६ ॥

स दृष्टिर्भोगभूजाताः सौधर्मैशानकल्पयोः ।
पर्याप्ताः कर्मभूसंज्ञिमानवा भोगभूमिषु ॥ १२७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिव्राड् ब्रह्मकल्पान्तं यात्युग्राचारवानपि ।
आजीवकः सहस्रारकल्पान्तं दर्शनोज्झितः ॥ १२८ ॥
यान्त्यच्युतान्तमुत्कर्षात्तिर्यंचो मानवा अपि ।
सम्यग्दर्शनसंपन्नाऽसंयता देशसंयताः ॥ १२९ ॥
मर्त्यासंयतसद्दृष्टिदेशव्रतिकुदृष्टय : ।
येन्त्यग्रैवेयकान्तं ते यान्ति सद्द्रव्यसंयमात् ॥ १३० ॥
यान्ति सर्वार्थसिध्यंतं नराः संयमिनश्च्युताः ।
सर्वार्थसिद्धिजा मोक्षगाः स्युर्लोकान्तिका अपि ॥ १३१ ॥
सलोकपालाः शक्रादिदक्षिणेन्द्रा दिवश्च्युताः ।
शक्राग्रमहिषीयुक्ता नृषु निर्वात्यनन्तरम् ॥ १३२ ॥
यस्यां जातिजरामृत्युक्लेशाश्लेषो न विद्यते ।
सोक्ता सिद्धगतिर्यांति तां मर्त्या गुणभूषणाः ॥ १३३ ॥
प्ररूपणानामन्योन्ययोजनक्रमबुद्धये ।
गुणस्थानानि योज्यन्ते मार्गणादिषु केषुचित् ॥ १३४ ॥
चत्वारि पंच सर्वाणि चत्वारि नरकादिषु ।
पंचेन्द्रिये त्रसे सर्वाण्याद्यं त्वन्याक्षकाययोः ॥ १३५ ॥
संज्ञ्याद्याः क्षीणमोहान्ताः संयोगान्ताश्च ते क्रमात् ।
मोषोभयमनोवाक्षु मनोवाक्ष्वपरेष्वपि ॥ १३६ ॥
पर्याप्तद्वीन्द्रिया आदिस्तुरीयवचने पुनः
स्थावरादिसयोगान्ताः पूर्णा औदारिके मताः ॥ १३७ ॥
कुदक्सासादनोऽपूर्णः सुदृक् पुंवेद्यसंयतः ।
कवाटयोगी तन्मिश्रे मर्त्यतिर्यक्षु तद्द्वयम् ॥ १३८ ॥
पूर्णे वैक्रेयिकोऽपूर्णे तन्मिश्रः सुरनारके ।
मिश्रे न मिश्रः सासादनोत्पत्तिर्नरकेषु न ॥ १३९ ॥
आहारदेहपर्याप्त्या पूर्णापूर्णप्रमत्तयोः ।
अन्तर्मुहूर्तकालौ तु आहाराऽऽहारमिश्रकौ ॥ १४० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुदृक्सासादनसुदृक्चतुर्गतिगविग्रहे ।
कार्मणस्तु सयोगस्य प्रतरे लोकपूरणे ॥ १४१ ॥
स्थावरादिस्ववेदाऽनिवृत्त्यंताः स्युर्नपुंसके ।
असंख्यादिस्ववेदानिवृत्त्यन्ताः शेषवेदयोः ॥ १४२ ॥
कुदृगाद्यनिवृत्तिद्वित्रिचतुर्भागगा गुणाः ।
क्रोधत्रये क्रमाल्लोभे सूक्ष्मलोभान्तिका दश ॥ १४३ ॥
एकेन्द्रियादिपर्याप्तसंज्ञाद्याद्यगुणद्वये ।
स्यातां मतिश्रुताज्ञाने विभंगोऽपि यथाक्रमम् ॥ १४४ ॥
चतुर्थषष्ठप्रभृतिक्षीणमोहान्तगाः क्रमात् ।
ज्ञानत्रये मनःपर्ययेऽर्हत्सिद्धेषु केवलम् ॥ १४५ ॥
असंयमे चतुर्थान्ताः पंचमो देशसंयमे ।
प्रमत्ताद्यनिवृत्त्यंता यमे सामायिकद्वये ॥ १४६ ॥
परिहारर्द्धौ प्रमत्ताप्रमत्तौ सूक्ष्मलोभकः ।
स्यात्सूक्ष्मसांपरायेऽन्ये यथाख्याते तनौ न सः ॥ १४७ ॥
चतुरक्षैकाक्षायतसद्दृष्ट्याद्यास्तु दर्शने ।
छद्मस्थान्ताः स्मृताश्चक्षुष्यचक्षुष्यवधौ क्रमात् ॥ १४८ ॥
केवले जिनसिद्धाः स्युः स्थावराद्याश्चतुर्गुणाः ।
अप्रशस्तत्रिलेश्यासु प्रमत्तान्ताश्च कीर्तिताः ॥ १४९ ॥
शुभलेश्यासु संज्ञ्यादिसप्तमान्तास्ततोऽपरे ।
शुक्लायां स्युः सयोगान्ता लेश्यातीतास्ततः परे ॥ १५० ॥
भव्ये सर्वगुणस्थानान्यभव्ये प्रथमो गुणः ।
मिथ्यात्वादित्रये मिथ्यादृष्ट्याद्याः स्युस्त्रयो गुणाः ॥ १५१ ॥
वेदकाद्योपशमयोश्चतुर्थाद्याश्चतुर्गुणाः ।
चतुर्थान्युपशान्तान्ता द्वितीयोपशमे मताः ॥ १५२ ॥
सिद्धान्ताः स्युश्चतुर्थाद्याः सम्यक्त्वे क्षायिके वरे ।
संज्ञिनि द्वादश गुणा मिथ्यादृष्टिरसंज्ञिनि ॥ १५३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुदृष्ट्यादिसयोगान्ता आहारे कार्मणे स्थिताः ।
अयोगिनश्चानाहारे सिद्धा निर्धूतकार्मणाः ॥ १५४ ॥
चतुर्दशसु मिथ्याद्दक्पूर्णेऽपूर्णे च संज्ञिनि ।
सासादनायतसुद्दक्प्रमत्तास्तु गुणास्त्रयः ॥ १५५ ॥
पूर्णे जीवसमासे स्युः संज्ञिनोऽन्ये जिनौ विना ।
एवं जीवसमासेषु मार्गणा अपि योजयेत् ॥ १५६ ॥
सप्तम्याः श्रेण्यसंख्यातभागमात्रास्ततः क्रमात् ।
घर्मायां नारका यावदसंख्यातगुणाः स्मृताः ॥ १५७ ॥
पंचाक्षाः प्रतराऽसंख्यभागमात्रास्ततोऽधिकाः।
चतुस्त्रिद्वीन्द्रिया जीवाः क्रमात्ते त्रसकायिकाः ॥ १५८ ॥
असंख्यलोकाः स्युस्तेजस्कायिकाः क्रमशोऽधिकाः ।
तदसंख्येयभागेन पृथ्व्यप्पवनकायिकाः ॥ १५९ ॥
अनंतानंतसंख्याता निगोदाः क्रमशोऽधिकाः ।
वनस्पतय एकाक्षास्तिर्यञ्चश्च यथोचितम् ॥ १६० ॥
अन्तरद्वीपकुनराः संख्याता गुणिताः क्रमात् ।
संख्यातरूपैः कुरुषु हरिरम्यकवर्षयोः ॥ १६१ ॥
हैमवतभूहैरण्यवतोर्व्योर्भोगभूमिजाः ।
भरतैरावतक्षेत्रे विदेहे पूर्णमानवाः ॥ १६२ ॥ युग्मं ।
लब्ध्यपूर्णा जगच्छ्रेण्यसंख्यभागमिता मताः ।
भरतादिषु कर्मावनीषु तेभ्योऽधिका नराः ॥ १६३ ॥
असंख्यश्रेणिवैमानिकेभ्योऽसंख्यगुणाः क्रमात् ।
भावना वाना ज्योतिष्कास्तेभ्यः संख्यातसंगुणाः ॥ १६४ ॥
मर्त्येभ्योऽसंख्यगुणिता असंख्यश्रेणिनारकाः ।
तेभ्यो देवास्ततः सिद्धाश्चासंख्यानंतसंगुणाः ॥ १६५ ॥
तिर्यंचोऽनंतगुणितास्तेभ्यः संसारिणोऽधिकाः ।
सिद्धराशिप्रमाणेन सर्वे जीवास्ततोऽधिकाः ॥ १६६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आधारे बादराः सूक्ष्माः सर्वत्र त्रसनालिगाः ।
त्रसास्तु विकलाक्षाः स्युस्तिर्यग्लोके व्यवस्थिताः ॥ १६७ ॥
कर्मायत्तश्चिरं जीवः संसारे पर्यटत्यसौ ।
प्रकृत्याऽष्टविधं त्वष्टचत्वारिंशच्छतं च तत् ॥ १६८ ॥
यत्तत्राष्टविधं ज्ञानदर्शनावरणीयतः ।
स्याद्वेदनीयमोहायुर्नामगोत्रान्तरायतः ॥ १६९ ॥
ज्ञानं मतिश्रुतावधिमनःपर्ययकेवलम् ।
आवृणोतीति तज्ज्ञानावरणं पंचभेदगम् ॥ १७० ॥
स्त्यानगृद्धिर्निद्रानिद्राप्रचलाप्रचलाद्वयम् ।
निद्रा च प्रचला चक्षुरचक्षुर्दर्शनावृती ॥ १७१ ॥
अवधेः केवलस्यापि दर्शनस्यावृती इति ।
चतुर्विधेऽपि स्वावार्ये दर्शनावरणे नव ॥ १७२ ॥ युग्मम् ।
सातासातद्वयं वेद्य[illegible]तः ।
मिथ्यात्वं सम्यङ्मिथ्यात्वं सम्यक्त्वं दृग्विमोहनम् ॥ १७३ ॥
क्रोधादिभेदानंतानुबन्धी संज्वलनस्तथा ।
प्रत्याख्यानः कषायः स्यादप्रत्याख्यान इत्यमी ॥ १७४ ॥
चारित्रमोहनीयं स्युर्नोकषायाश्च ते नव ।
पुरुषस्त्रीषण्ढवेदत्रयं रत्यरती तथा ॥ १७५ ॥
हास्यशोकौ भयं चापि जुगुप्सायुश्चतुर्विधम् ।
निरयायुस्तिर्यङ्मर्त्यसुरायूंषीति वर्णितम् ॥ १७६ ॥
नाम त्रिनवतिर्भेदैर्गतिस्तत्र चतुर्विधा ।
जातिः पंचविधा पंचभेदभंगं च बन्धनम् ॥ १७७ ॥
पंचभेदोंऽगसंघातः स्युः संस्थानानि षट् तनोः ।
त्रीण्यंगोपांगनामानि देहसंहननानि षट् ॥ १७८ ॥
वर्णाः पंच द्विगन्धौ स्युः पंच रसाः स्पर्शाष्टकम् ।
आनुपूर्व्यश्चतस्रोऽगुरुलघ्वेकं शरीरगम् ॥ १७९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपघातपरघातोच्छ्वासाऽऽतापचतुष्टयम् ।
उद्योतमेकं द्विविधं विहायोगतिकर्म यत् ॥ १८० ॥
त्रसबादरपर्याप्तप्रत्येकं स्यात् स्थिरं शुभम् ।
सुभगं सुस्वरादेययशस्कीर्ति च सेतरम् ॥ १८१ ॥
निर्माणमेकं स्यात्तीर्थकरनामाप्यनुत्तरं ।
उच्चनीचद्विभेदस्य पात्रं तद्गोत्रकर्म यत् ॥ १८२ ॥
स्याद्दानलाभभोगोपभोगवीर्यान्तरायतः ।
पंचभेदोऽन्तरायोऽयं दानाद्यन्तरमेति यत् ॥ १८३ ॥
त्रिंशत्याद्यंतरायेषु कोटीकोट्यः परा स्थितिः ।
सप्ततिर्मोहनीयस्य स्युर्विंशतिर्नामगोत्रयोः ॥ १८४ ॥
सागराणां त्रयस्त्रिंशत्स्यादायुष्यपरा स्थितिः ।
वेद्ये मुहूर्ताः स्युर्द्वादशाष्टौ ते नामगोत्रयोः ॥ १८५ ॥
शेषेष्वन्तर्मुहूर्त्तः स्यादात्मना सह संस्थितेः ।
कालः प्रतिक्षणं बद्धकर्मणां स्थितिरीरिता ॥ १८६ ॥
कर्मस्पर्शगुणो यस्तु सोनुभाग इतीष्यते ।
लतानिंबगुडाद्यात्मनानाभेदैस्त्रिजैर्युतः ॥ १८७ ॥
संतानापेक्षयाऽनादिः सादिर्नूतनबन्धनात् ।
प्रदेशः कर्मणः स्कन्धः प्रकृत्यादित्रयात्मकः ॥ १८८ ॥
जीवकर्मस्वरूपज्ञो विज्ञानातिशयान्वितः ।
कर्मनोकर्मनिर्मोक्षादात्मा शुद्धात्मतां व्रजेत् ॥ १८९ ॥
श्रीमान्नः परमां रमां निरुपमां दद्यादनंतो जिनो
विज्ञानातिशयेन येन दुरितात्मानौ विभिन्नौ कृतौ ।
संपृक्तौ प्रतिपक्षहीनममितं प्राप्तं सदावस्थितं ।
शर्मानक्षजमक्षयं स्वतिशयं शुद्धात्मजातं नुतम् ॥ १९० ॥

इति श्रीमद्वीरनंदिसिद्धान्तिचक्रवर्तिप्रणीते श्री 'आचारसार' नाम्नि शास्त्रे जीवकर्मप्ररूपणात्मक एकादशोऽधिकारः ॥ ११ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ द्वादशोधिऽकारः ॥ १२ ॥

सद्वंशजः पेशलविश्वशीलः
श्लिष्टो गुणैर्पुष्टतरैर्विशिष्टैः ।
दुरंतदुःकर्महरः कृतार्थो
धर्मो जिनः स्ताद्विजयश्रिये नः ॥ १ ॥

धर्मैर्गुप्तिभिः करणसंज्ञाऽक्षप्राणसंयमैः ।
अष्टादशसहस्राणि शीलान्यन्योऽन्यसंगुणैः ॥ २ ॥

सत्क्षान्तिमार्दवार्जवशौचाऽऽकिंचन्यसंयमाः ।
ब्रह्मचर्यतपःसत्यत्यागा धर्मा दश स्मृताः ॥ ३ ॥

चत्वारः सत्क्षमाद्याः स्युश्चतुःक्रोधादिनिर्जयाः ।
परिग्रहपरित्यागस्त्यागः शेषाः पुरोदिताः ॥ ४ ॥

मनोवचनकायानां व्यापाराः करणास्त्रयः ।
ज्ञाताख्यिगुप्तयः संज्ञाश्चतस्रोऽक्षाणि पंच च ॥ ५ ॥

प्राणा दशोर्वीतोयाग्निमरुत्प्रत्येककायिकाः ।
अनंतकायाः स्युर्द्वित्रिचतुःपंचेन्द्रियांगिनः ॥ ६ ॥

क्षमायुक्ते मनोगुप्ते सुमनस्यशनास्पृहे ।
स्पर्शनोर्वीयमे शीलमाद्यमेवं पराण्यपि ॥ ७ ॥

एकविंशत्यहिंसाद्या अनतिक्रमणादयः ।
चत्वारः स्युः शतं प्राणप्राणिघातविवर्जनम् ॥ ८ ॥

प्रायश्चित्तानि शीलानामाराधनगुणा दश ।
आलोचनगुणाश्चैते गुणास्त्वन्योन्यसंगुणाः ॥ ९ ॥

व्रतान्यक्षनिरोधश्च मार्दवादिचतुष्टयम् ।
भीरत्यरतिजुगुप्साऽज्ञानपैशून्यवर्जनम् ॥ १० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्त्वमप्रमादश्च मनोवाक्कायगुप्तयः ।
एकविंशतिरित्येवमहिंसादिगुणाः स्मृताः ॥ ११ ॥
अतिक्रमणव्यतिक्रमानाचारातिचारगाः ।
त्यागा अनतिक्रमणचतुष्टयमितीरितम् ॥ १२ ॥
दशप्राणैर्दशप्राणिष्वेकैकस्य वधाच्छतम् ।
प्राणप्राणिवधास्तेषां त्यागाः शतगुणा मताः ॥ १३ ॥
स्त्रीसंगोऽर्थार्जनं स्वांगमंडनं वृष्यभोजनम् ।
गीतं वाद्यं स्रगादिश्च शयनाशनभूषणम् ॥ १४ ॥
रात्रिसंचरणं राजसेवा कुत्सितसंगमः ।
इत्यमीषां परित्यागा दश शीलप्रसाधकाः ॥ १५ ॥
दशाऽत्र पूर्वमुक्तानि प्रायश्चित्तानि विस्तरात् ।
आलोचनागस्त्यागाः स्युरालोचनगुणा दश ॥ १६ ॥
सदयेऽतिक्रमापेते त्यक्तभूभूमिघातने ।
सालोचने व्यपेतस्त्रीसंगे आकंपितोज्झितं ॥ १७ ॥
आद्यो गुणो भवेदेवं शेषान्नुच्चारयेद्गुणान् ।
गुणाश्चतुरशीतिः स्युर्लक्षाणीति प्रसिद्धिदाः ॥ १८ ॥
गुणादौ पंच संख्यानं प्रस्तारः परिवर्त्तनम् ।
नष्टमुद्दिष्टमित्येते गुणनादिक्रमा मताः ॥ १९ ॥
पूर्वपूर्वेऽखिलाः सार्द्धमेकैकैरुत्तरोत्तरैः ।
मिलन्तीति क्रमात्तांस्तैर्गुणिते प्रमितिर्मता ॥ २० ॥
निक्षिप्याद्यादिकं पिंडं प्रति पिंडं क्रमात्क्षिपेत् ।
एकमेकं द्वितीयादेः समप्रस्तारके गुणे ॥ २१ ॥
द्वितीयाद्यैर्मितं पिंडं निक्षिप्याद्यादिमत्र तु ।
एकमेकं द्वितीयादेः प्रस्तारे विषमे क्षिपेत् ॥ २२ ॥
अन्तं गत्वाऽऽदिगे आद्ये द्वितीयोंऽकः सरत्युभौ ।
अन्तं गत्वाऽऽदिसंस्थौ चेत्तृतीयोंऽन्येष्वयं क्रमः ॥ २३ ॥ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यसंख्याहृते स्वेष्टभाज्ये शुद्धोन्तसंस्थितः ।
शेषे शेषमितस्थाने संस्थितौंऽकस्ततः परम् ॥ २४ ॥
लब्धं रूपाधिकं भाज्यं भाज्यशेषेऽन्यथा पुनः ।
लब्धमेव स्वसंख्यायाः क्रियाऽन्या स्यात्पुरोदिता ॥ २५ ॥
ऊर्ध्वमात्मप्रमाणघ्ने रूपे तस्मिन्नधः क्रमात् ।
स्वस्वसंख्याहते संख्या सर्वत्राऽनंकितोनितौ ॥ २६ ॥
ये पालयंति शीलानि गुणांश्च प्रगुणाशयाः ।
लभन्ते ते भवच्छेदादनंतसुखसम्पदम् ॥ २७ ॥
प्रणतभुवननाथो धर्मतीर्थाधिनाथः
प्रहतदुरितवर्गः प्रोक्तसन्मुक्तिमार्गः ।
प्रशमितजनतार्त्तिः शुद्धदृग्ज्ञानमूर्त्तिः
प्रवरकनककान्तिः श्रेयसे वोऽस्तु शान्तिः ॥ २८ ॥
मिथ्याभावभवातिदर्पपरतद्दुःशासनोच्छेदकं
प्रज्ञाह्लावशवर्त्तमानजनतासत्सौख्यसंपादकम् ।
नानारूपविशिष्टवस्तुपरमस्यैोद्वादलक्ष्मीपदं
जेजीयाज्जिनराजशासनमिदं स्वाचारसारप्रदम् ॥ २९ ॥
सिद्धान्तार्णवपूर्णतारकपतिस्तर्काम्बुजाहर्पतिः
शब्दोद्यानवनामृतोरुसरणिर्योगीन्द्रचूडामणिः ।
त्रैविद्यापरसार्थनामविभवः प्रोद्भूतचेतोभवः
स्थेयादन्यमृतावनीभृदशनिः श्रीमेघचन्द्रो मुनिः ॥ ३० ॥
यद्वाक्क्षीरवतंसमंडनमणिर्वैदग्ध्यदिग्धात्विषां
यच्चारित्रविचित्रता शमभृतां सूत्रं पवित्रात्मनाम् ।
यत्कीर्त्तिर्धवलप्रसादनधुरं धत्ते धरायोषितः
स त्रैविद्यविभूषणं विजयते श्रीमेघचन्द्रो मुनिः ॥ ३१ ॥
वैदग्ध्यश्रीवधूटीपतिरतुलगुणालंकृतिर्मेघचन्द्र-
स्त्रैविद्यस्यात्मजातो मदनमहिभृतो भेदने वज्रपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सैद्धान्तिव्यूहचूडामणिरनुफलचिन्तामणिर्भूजनानां
योऽभूत्सौजन्यरुन्द्रश्रियमवति महौ वीरनंदी मुनीन्द्रः ॥३२॥

श्रीमेघचन्द्रोज्ज्वलमूर्त्तिकीर्त्तिः
समस्तसैद्धान्तिकचक्रवर्त्ती ।
श्रीवीरनन्दीकृतवानुदार-
माचारसारं यतिवृत्तसारम् ॥ ३३ ॥

इति श्रीमन्मेघचन्द्रत्रैविद्यदेवपादप्रसादाऽऽसादिताऽऽत्मप्रभाव-
समस्तविद्याप्रभावसकलदिग्वर्त्तिकीर्त्तिश्रीमद्वीरनंदिसैद्धांति-
चक्रवर्त्तिप्रणीते श्री ' आचारसार ' नाम्नि ग्रन्थे
शीलगुणवर्णनात्मको द्वादशोधिकारः ॥ १२ ॥

श्लोकप्रमाणमाह ।

ग्रन्थप्रमाणमाचारसारस्य श्लोकसम्मितम् ।
भवेत्सहस्रं द्विशतं पंचाशच्चांकतस्तथा ॥ १ ॥

इति श्रीमद्वीरनन्दिसिद्धान्तिचक्रवर्त्तिप्रणीतः श्रीआचारसारः
समाप्तिं पफाण ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणिकचन्द-ग्रन्थमाला ।

(पूर्वप्रकाशित ग्रन्थ)

१ **लघीयस्त्रयादिसंग्रह** । भट्टाकलंकदेवकृत लघीयस्त्रय सटीक, आचार्य अनन्तकीर्तिकृत लघु सर्वज्ञसिद्धि—बृहत्सर्वज्ञसिद्धि और अकलंकदेवकृत स्वरूपसंबोधन, इन चार ग्रन्थोंका संग्रह । मू० ।=)

२ **सागारधर्मामृत** । पं० आशाधरकृत मूल और स्वोपज्ञटीका सहित । मू० ।=)

३ **विक्रान्तकौरवीय नाटक** । कवि हस्तमल्लकृत । मू० ।=)

४ **पार्श्वनाथचरित** । महाकवि वादिराजसूरिकृत उत्कृष्ट काव्य । मू० ॥)

५ **मैथिलीकल्याण नाटक** । कवि हस्तिमल्लकृत । मू० ।)

६ **आराधनासार** । आचार्य देवसेनकृत मूल (प्राकृत) और रत्नकीर्तिदेवकृत संस्कृतटीका । मू० ।)॥

७ **जिनदत्तचरित्र** । आचार्य गुणभद्रकृत । मू० ।)॥

८ **प्रद्युम्नचरित्र** । आचार्य महासेनकृत । मू० ॥)

९ **चारित्रसार** । श्रीमच्चामुण्डरायकृत । मू० ।=)

१० **प्रमाणनिर्णय** । आचार्य वादिराजकृत । मू० ।-)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवेदन ।

इस ग्रन्थमालाकी सहायता करना प्रत्येक धर्मात्माक है । यह केवल प्राचीन जैनसाहित्यके उद्धारके लिए प्रकाशित की जाती है । प्रत्येक ग्रन्थका मूल्य ठीक लागतके बराबर रक्खा जाता है । इसके प्रत्येक ग्रन्थकी दश दश पाँच पाँच प्रतियाँ खरीदकर विद्वानोंको, पुस्तकालयोंको, जैनमन्दिरोंको धर्मार्थ देना चाहिए । प्रभावनाके लिए इससे अच्छा काम और नहीं हो सकता । ग्रन्थमालाके किसी ग्रन्थकी कमसे कम २५० प्रतियाँ लेनेवालोंका फोटू उस ग्रन्थकी तमाम प्रतियोंमें लगवा दिया जाता है ।

निवेदक—

नाथूराम प्रेमी, मंत्री

माणिकचन्दजैनग्रन्थमाला समिति,

हीराबाग, **बम्बई** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org